पत्रलेखा तु ततः प्रभृति दर्शनेनैव समुपजातसेवारसा न दिवा, न रात्रौ, न सुप्तस्य, नासीनस्य, नोत्थितस्य, न भ्रमतो न राजकुलगतस्य छायेव राजसूनोः पार्श्वं मुमोच। चन्द्रापीडस्यापि तस्यां दर्शनादारभ्य प्रतिक्षणमुपचीयमाना महती प्रीतिरासीत्। अभ्यधिकञ्च[1] प्रतिदिवसमस्याः प्रसादमकरोत्, आत्महृदयादव्यतिरिक्तामिव चैनां सर्वविश्रम्भेष्वमन्यत।

शुकनासोपदेश-वर्णनम्

एवं समतिक्रामत्सु[2] दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतीहारा-

---

पत्रलेखेति। पत्रलेखा = कुलूतेश्वरदुहिता, तु, ततः प्रभृति = तस्मात् कालादारभ्य, दर्शनेन = अवलोकनेन, एव चन्द्रापीडस्येति शेषः, समुपेत्यादिः—समुपजातः (= समुत्पन्नः) सेवायाम् (= परिचर्यायाम्) रसः (= अनुरागः) यस्याः सा तादृशी, सती, न दिवा = न दिवसे, न रात्रौ = न निशायाम्, न सुप्तस्य = न शयानस्य, न आसीनस्य = न निषण्णस्य, न उत्थितस्य = न विहितोत्थानस्य, न भ्रमतः = न भ्रमणं कुर्वतः, न राजकुलगतस्य = न राजभवनगतस्य, राजसूनोः = राजकुमारस्य चन्द्रापीडस्य, छाया = स्वप्रतिबिम्बम्, इव, पार्श्वम् = सामीप्यम्, मुमोच = तत्याज। यथा कस्यचिदपि जनस्य छाया तं न कदापि त्यजति यद्वा—छाया = अनातपः, पार्श्वम् = बाहुमूलाधोभागं न त्यजति तथैव सा सर्वदा तेन राजपुत्रेण सहैव सती सेवापराऽभूत्। उपमालङ्कारः।

चन्द्रापीडस्येति। चन्द्रापीडस्य = राजकुमारस्य, अपि, दर्शनात् = अवलोकनात्, आरभ्य = प्रभृति, तस्या इति शेषः, तस्याम् = पत्रलेखायाम्, प्रतिक्षणम् = क्षणं क्षणम् प्रति, उपचीयमाना = वर्द्धमाना, सती, महती = सातिशया, प्रीतिः = स्नेहः, आसीत् = अभूत्।

अभ्यधिकमिति। च शब्दः किञ्चेत्यर्थे। अस्याः पत्रलेखायाः, प्रतिदिवसम् = प्रतिदिनम्, अभ्यधिकम् = अधिकाधिकम्, प्रसादम् = अनुग्रहम्, अकरोत् = चकार। सर्वविश्रम्भेषु = सकल-विश्वासस्थलेषु, च, एनाम् = पत्रलेखाम्, आत्महृदयात् = निजस्वान्तात्, अव्यतिरिक्ताम् = अभिन्नाम्, इव, अमन्यत = अमंस्त, ज्ञातवानिति भावः। अत्रोत्प्रेक्षा।

साम्प्रतं यौवराज्याभिषेकात् पूर्वं चन्द्रापीडाय किमपि विशिष्टमुपदेष्टव्यमावश्यकमिति निरूपयति-**एवमित्यादिना।** एवम् = पूर्वोक्तप्रकारेण, दिवसेषु = दिनेषु, समतिक्रामत्सु = गच्छत्सु, व्यतीतेष्विति, भावः, राजा = नृपः, तारापीडः, चन्द्रापीडस्य = एतन्नाम्नो राजकुमारस्य, यौवराज्याभिषेकम्—यौवराज्ये (= युवराजकर्मणि) अभिषेकम् (= अभिषेचनम्) युवराजपदे प्रतिष्ठामिति भावः, चिकीर्षुः =

पत्रलेखा ने तो उसी समय से लेकर [चन्द्रापीड के] दर्शन से ही उत्पन्न हुए सेवारस वाली होती हुई अर्थात् उसे सेवाभाव उत्पन्न हो गया था, अतः न दिन में, न रात में, न सोते हुए, न बैठे हुए, न खड़े हुए, न घूमते हुए और न राजभवन में गये हुए राजकुमार का छाया के समान साथ (पीछा) छोड़ा। [अर्थात् जैसे परछाईं सदैव साथ रहा करती है वैसे ही पत्रलेखा भी राजकुमार के साथ ही साथ रहने लगी।] चन्द्रापीड की भी, [पत्रलेखा के] दर्शन से लेकर उस में प्रतिक्षण बढ़ती हुई बहुत अधिक प्रीति (प्रेम) हो गयी थी, उसका प्रेम लगातार बढ़ता गया और वह प्रतिदिन उस पर और अधिक अनुग्रह (कृपा) करने लगा। और उस (चन्द्रापीड) ने अपनी सभी विश्वसनीय बातों में उसे अपने हृदय से अभिन्न माना। [उससे कोई भी बात नहीं छिपाता था।]

शुकनास के उपदेश का वर्णन

इस प्रकार से [कुछ] दिन बीत जाने पर चन्द्रापीड के यौवराज्य (पद) पर अभिषेक करने के इच्छुक राजा (तारापीड) ने द्वारपालों को [आवश्यक] सामग्री के समूह के संग्रह करने के लिए

---

१. प्रतिदिनम्।

२. केषुचिद्दिवसेषु।

नुपकरणसम्भार-संग्रहार्थमादिदेश । समुपस्थितयौवराज्याभिषेकञ्च तं कदाचिद्दर्शनार्थमागत-मारूढविनयमपि विनीततरमिच्छन् शुकनासः सविस्तरमुवाच--

"तात चन्द्रापीड ! विदितवेदितव्यस्याऽधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति । केवलञ्च निसर्गत एवाऽभानुभेद्यमरत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम् ।

कर्तुमिच्छुः, सन्, प्रतीहारान् = द्वारपालान्, उपकरण-सम्भार-संग्रहार्थम्—उपकरणम् (= अभिषेक-सामग्री) तस्य यः संभारः (= समूहः) तस्य संग्रहार्थम् = आनयनार्थम्, आदिदेश = आज्ञापयामास ।

समुपस्थितेति । च शब्दः किञ्चेत्यर्थे । समुपस्थितेत्यादिः—समुपस्थितः (= सम्प्राप्तः) यौवराज्यस्य (= युवराजकर्मणः) अभिषेकः (= अभिषेचनम्) यस्य तं तादृशम्, कदाचित् = कस्मिंश्चिद्दिवसे, दर्शनार्थम् = अवलोकनार्थम्, शुकनासस्येति शेषः । आगतम् = सम्प्राप्तम्, आरूढविनयम् = सम्प्राप्तविनयम्, अपि, तम् = चन्द्रापीडम्, विनीततरम् = विनम्रतरम्, इच्छन् = अभिलषन्, शुकनासः = एतन्नामा प्रधानामात्यः, सविस्तरम् = सव्यासम्, विशदम्, उवाच = अवोचत् ।

शुकनासः चन्द्रापीडाय किमुपदिदेशेति निरूपयति—तातेत्यादिना । तात = हे वत्स, चन्द्रापीड !, विदितवेदितव्यस्य—विदितम् (= ज्ञातम्) वेदितव्यम् (= ज्ञातव्यम्) येन तस्य तादृशस्य, अधीत-सर्वशास्त्रस्य—अधीतानि (= पठितानि) सर्वाणि (= सकलानि) शास्त्राणि (= न्यायादीनि वेदादीनि च) येन तस्य तादृशस्य, ते = तव, अल्पम् = स्तोकम्, अपि, उपदेष्टव्यम् = वक्तव्यम्, न = नैव, अस्ति = वर्तते । अत्रोपदेष्टव्यत्वाभावं प्रति पूर्वोक्तं विशेषणद्वयं कारणमिति पदार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

यद्येवं तर्हि कस्मादयमुपदेशारम्भ इत्यत आह—केवलमिति । च शब्दः किञ्चेत्यर्थे । केवलम् = परम्, यौवनप्रभवम् = तारुण्यप्रभवम् (= यौवनात् प्रभवति = समुत्पद्यते इति तादृशम्) तमः = अज्ञानान्धकार, निसर्गतः = स्वभावतः, एव, अभानुभेद्यम् = असूर्योच्छेद्यम्, सूर्येणापि दूरीकर्तुं योग्यं नास्तीति भावः, अरत्नालोकच्छेद्यम्—न (= नैव) रत्नानाम् (= मणीनाम्) आलोकेन (= प्रकाशेन, प्रभया) छेद्यम् (= नाशयितुं योग्यम्), उत्कृष्टमणीनां प्रभयापि यौवनजन्यतमो नाशयितुं न शक्यते, अप्रदीपप्रभापनेयम्—न (= नैव) प्रदीपप्रभया (= दीपालोकेन) अपनेयम् (= विनाशयोग्यम्, अपनयनयोग्यम्), अनेक-प्रदीपप्रकाशैरपि तारुण्यतमोऽपनेतुं न शक्यते इति भावः, कीदृशमित्यत आह--अतिगहनम्—अतिशयेन (= निरवधिकतया) गहनम् (= अलब्धमध्यम्) सर्वविधतमांसि सूर्यस्य, रत्नानां दीपानां वा प्रकाशेन दूरीभूय लोकानां सौख्याय जायन्ते किन्तु यौवन-प्रभवं तमस्तु अतिगहनत्वात् प्रसिद्धेन केनाप्युपायेन दूरीकर्तुं न शक्यतेऽतस्तस्यातिनिकृष्टत्वमिति भावः । अत्रातिशयोक्तिः, समुच्चयो व्यतिरेकः काव्यलिङ्गञ्चेत्येतेषां परस्परमङ्गाङ्गिभावेन सङ्करालङ्कारः ।

आदेश दे दिया । जिसका यौवराज्याभिषेक उपस्थित (अर्थात् शीघ्र ही होनेवाला था ऐसे चन्द्रापीड को जो किसी समय [शुकनास के] दर्शन करने के लिए आया था, और जो स्वतः विनय (विनम्रता अथवा शिक्षा)से युक्त था,और अधिक विनीत (शिक्षित)करने के लिए शुकनास ने विस्तारपूर्वक कहा—

"तात (वत्स) चन्द्रापीड ! जानने योग्य [सभी] का ज्ञान रखने वाले तथा समस्त (राजनीति आदि) शास्त्रों को पढ़ चुके हुए तुम्हारे लिए अब थोड़ा-सा भी उपदेश करने योग्य नहीं [शेष बचा] है । परन्तु [इतना कहना आवश्यक है कि] यौवन से उत्पन्न होनेवाला अन्धकार स्वभावतः अत्यन्त गहन (घना) होता है जो सूर्य द्वारा [अपने प्रकाश से] भी नहीं भेदा (दूर किया) जा सकता है, न रत्नों की कान्ति (चमक) से छेदा (हटाया) जा सकता है और न उत्कृष्ट दीप की ज्योति (प्रकाश) से ही हटाया जा सकता है । [अतः ऐसे अन्धकार से बचना आवश्यक है ।]

१. उपसंभार० । २. ···कर्तुमिच्छन् । ३. वेद्यस्य । ४. तु ।

अपरिणामोपशमो दारुणो लक्ष्मीमदः । कष्टमनञ्जनवर्त्तिसाध्यमपरमैश्वर्य्यतिमिरान्धत्वम्[1] । अशिशिरोपचारहार्य्योऽतितीव्रो[2] दर्पदाहज्वरोष्मा । सततममूलमन्त्रगम्यो[3] विषमो विषयविषा-[4]

अपरिणामेति । लक्ष्मीमदः—लक्ष्म्याः (=धनसम्पत्तेः) मदः (=उन्मत्तता) अपरिणामोपशमः—न (=नैव) विद्यते परिणामे (=वयःपरिणतौ, वार्द्धक्यावस्थायाम्) उपशमः (=निवृत्तिः) यस्य स तादृशः, अत एव, दारुणः=भीषणः । सुरादिमादकपदार्थोपसेवनोत्पन्नोन्मत्तता तु औषधादिना कालाधिकेऽतीते च स्वयमेव नश्यति परन्तु धनसम्पत्तिसंसर्गजन्यो मदस्तु केनाप्युपायेन न शाम्यति जीवनपर्यन्तं च मदयतीति अस्य वैलक्षण्यं स्पष्टम् । काव्यलिङ्गमत्र पदार्थहेतुकम् ।

कष्टमिति । अनञ्जनवर्तिसाध्यम्—न (=नैव) अञ्जनवर्त्या (= बिडालादि-वसाकज्जलादिना) साध्यम् (= प्रतीकार्यम्), ऐश्वर्यतिमिरान्धत्वम्—ऐश्वर्यम् (= धनादिवैभवम्) एव तिमिरम् (=तिमिराख्यो नेत्ररोगः) तेन अन्धत्वम् (= अवलोकनशक्तिराहित्यम्), अपरम् = प्रसिद्धेभ्यो नेत्ररोगेभ्यो भिन्नम्, कष्टम् =दुःखकरम् । प्रसिद्धं तिमिरान्धत्वन्तु विशेषवर्त्तिकया नाशयितुं शक्यते परन्तु ऐश्वर्यतिमिरेण जातमन्धत्वं तु न कथमपि दूरीकर्तुं शक्यते । तिमिररोगापहरणविषये चेत्यमुक्तमष्टाङ्गहृदये आयुर्वेदीयग्रन्थे—"रसेन्द्रभुजगौ तुल्यौ तयोस्तुल्यमथाञ्जनम् । ईषत्कर्पूरसंयुक्तमञ्जनं तिमिरापहम् ।"

अशिशिरेति । अतितीव्रः=अतिशयेन तीक्ष्णः, दर्पदाहज्वरोष्मा—दर्पः (=अहङ्कारः) एव दाहज्वरः (= तीव्रतापः) तस्य ऊष्मा (= उष्णता, घर्मः) अशिशिरोपचार्यः—न (=नैव) शिशिरैः (=शीतलैः) उपचारैः (=स्रक्चन्दनादिभिः) हार्यः (=हर्तुं योग्यः, शमनीयः) । अन्यज्वरजन्योन्योष्मा तु प्रसिद्धैः शीतलोपचारैः शमयितुं शक्यः, परन्तु दर्पदाहज्वरजन्योष्मा न कथमपि शमयितुं शक्य इति भावः ।

सततमिति । विषमः=कठिनः, विषयविषास्वादमोहः—विषयाः (= स्रक्चन्दनादयः) [विषिण्वन्ति विषयिणमिति व्युत्पत्तिः] एव विषाणि (=गरलानि) [प्राणहरणतुल्यकष्टकारित्वात्] तेषां य आस्वादः (=भक्षणम्, उपभोगः) तेन यो मोहः (=मूर्च्छा, अज्ञानता), सततम् = निरन्तम्, अमूलमन्त्रगम्यः—न (=नैव) मूलैः (= ओषधिमूलैः) मन्त्रैः (=विषप्रभावदूरकरण-समर्थशब्दसमूहविशेषैः) गम्यः (= साध्यः) । अन्यादृशो मोहस्तु ओषधिमूलैर्मन्त्रविशेषैः वा नियन्तुं शक्यः, परन्तु विषयविषास्वादेन यो मोहो जायते, स न केनापि उपायेन नियन्तुं शक्य इति तस्य विषमत्वम् ।

लक्ष्मी (धनादि सम्पत्ति) का दारुण (भयानक) मद (नशा) परिणाम (वृद्धावस्था) में भी शान्त (समाप्त) होनेवाला नहीं है । [अन्य मद तो अधिक समय बीतने पर प्रभावहीन हो जाते हैं किन्तु लक्ष्मीमद कभी भी समाप्त नहीं होता है ।] और ऐश्वर्य (अतिशय समृद्धि) रूपी अन्धकार से उत्पन्न अन्धापन (मोतियाबिन्द) दूसरा ही है जो अञ्जन की वर्तिका (सुरमा की सलाई) से अच्छा नहीं होनेवाला, [और] कष्ट देने वाला है । अहंकाररूपी दाहक ज्वर की गर्मी अत्यन्त तीखी (तेज) अतः [चन्दन आदि] शीतल उपचारों (गर्मीनाशक दवाओं) से शान्त होनेवाली नहीं है । विषय (कामिनी-संसर्ग आदि) रूपी विष के आस्वाद (उपभोग) से होनेवाली मूर्च्छा अत्यन्त विषम

१. अपटलम् । २. अत्यन्ततीव्रो । ३. मूल । ४. गम्यो ।

स्वादमोहः। नित्यमस्नानशौचबध्यो[1] बलवान् रागमलावलेपः। अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीति[2] विस्तरेणाभिधीयसे[3]। १—गर्भेश्वरत्वम्, २—अभिनवयौवनत्वम् ३—अप्रतिमरूपत्वम्. ४—अमानुषशक्तित्वञ्चेति महतीयं[4] खल्वनर्थपरम्परा सर्वा।

नित्यमिति। बलवान्=बलशाली, रागमलावलेपः—रागः (=विषयासक्तिः) एव मलः (=पङ्कः) तस्य अवलेपः (= लेपनम्, संश्लेषः), नित्यम् = प्रतिदिनम्, अस्नानशौचबध्यः—न (=नैव) स्नानेन (=मज्जनादिना) शौचेन (=शुचिक्रिया) च बध्यः (= नाशनीयः, प्रक्षालनीयः), अन्यादृशः कर्दमाद्यवलेपस्तु स्नानेन अन्येन वा शौचोपायेन दूरीकर्तुं शक्यते परन्तु रागमलावलेपस्य परिमार्जनं तु न कथमपि सम्भवति। अत एवास्य बलवत्त्वम्। ["···· मलोऽस्त्रियाम्।" २।६।६५ इत्यमरेण मलशब्दः पुंसि नपुंसके च साधुः।]

अजस्रमिति। राज्यसुख-सन्निपात-निद्रा—राज्यम् (=आधिपत्यम्) तस्मात् तस्य वा यत् सुखम् (=आनन्दः) तदेव सन्निपातनिद्रा (=सन्निपात-प्रमीला) यद्वा-सन्निपातः=संघात एव निद्रा, अजस्रम्=निरन्तरम्, अक्षपावसानप्रबोधा—न (=नैव) क्षपायाः (=निशायाः) अवसाने (=अन्ते, समाप्तौ, प्रातःकाले इति भावः) प्रबोधः (=विनिद्रत्वं जागरणम्) यस्यां सा तादृशी, घोरा=भीषणा च, भवति=वर्तते। अन्यनिद्रायास्तु प्रातः अवसानं भवति तेन मनुष्या जाग्रति, किन्तु राज्यसुखानां संघातेन या निद्रा प्रादुर्भवति तस्यास्तु न कदापि अवसानम्, तेन च प्रबोधश्चेत्युभयमपि न भवतीति तस्या घोरात्वं स्पष्टम्। इति=अस्माद्धेतोः, विस्तरेण=विशदरूपेण, अभिधीयसे=उपदिश्यसे, त्वमिति शेषः। अचिरमेव युवराजपदे अभिषिक्ते सति त्वयि अपि पूर्वोक्ताः सर्वेऽपि दोषा सम्भाव्यन्तेऽतो हेतोः त्वदिष्टचिन्तकेन मया त्वमवश्यमुपदेशनीय इत्यत एवोपदिश्यसे इति भावः।

गर्भेश्वरत्वमिति। १-गर्भात् (=गर्भकालात्, जन्मतः) एव ईश्वरत्वम् (=प्रभुत्वम्), २-अभिनवयौवनत्वम्=अभिनवम् (=अतिनूतनम्) यौवनम् (=तारुण्यम्) यस्य तस्य भावस्तत्त्वम्, ३-अप्रतिमरूपत्वम्—अप्रतिमम् (= निरूपमम्, अतुल्यम्) रूपम् (= सौन्दर्यम्) यस्य तस्य भावस्तत्त्वम्, ४-अमानुषशक्तित्वम्—अमानुषी (=न विद्यते मानुषेषु तादृशी, दैवीति भावः) शक्तिः (=सामर्थ्यम्) यस्य तस्य भावस्तत्त्वम्, च, इति इयम्=एवं रूपा पूर्वोक्ता, महती=गरीयसी, सर्वा=सकला, अनर्थपरम्परा=अनिष्टपरम्परा, कष्टपरम्परा। अत्र हेतुमानलङ्कारः।

(कष्टकारक) तथा लगातार मूल (जड़ी बूटी) और मन्त्रों से दूर करने योग्य नहीं होती है, [अन्य प्रकार की मूर्च्छा कभी जड़ी-बूटी या मन्त्रों के प्रभाव से दूर हो जाती है किन्तु उपर्युक्त मूर्च्छा किसी से भी दूर नहीं होती है।] विषयाभिलाष रूपी मल (कीचड़ आदि दूषित पदार्थ) का अवलेप (सम्पर्क) सदैव स्नान और शौचक्रिया (प्रक्षालनादि) से भी नहीं नष्ट किया (हटाया) जा सकता। और राज्यसुखों के सन्निपात = समूहरूपी (या सन्निपात रोग रूपी या सन्निपात से होने वाली) निद्रा भयानक (प्रगाढ) है जो सदैव रात के बीत जाने पर भी जागरणरहित होती है। [अन्य प्रकार की नींद तो रात बीत जाने पर प्रातः जागरण से युक्त होती है, व्यक्ति जाग जाता है किन्तु राज्यसुखों के सन्निपात से होनेवाली नींद में ग्रस्त व्यक्ति कभी भी नहीं जाग सकता।]—इन्हीं कारणों से तुम से विस्तारपूर्वक कहा जा रहा है,समझाया जा रहा है। १-गर्भ अर्थात् जन्मकाल से ही ईश्वर (ऐश्वर्यवान्) होना, २-नया यौवन होना, ३-अनुपम (बेजोड़) सुन्दर होना, और ४-अमानुषी (सामान्य मानव में न होनेवाली अर्थात् दैवी) शक्ति होना—यह सभी अनर्थों की बहुत बड़ी परम्परा है। इन (चारों) में एक-एक (अकेला कोई) भी सभी प्रकार के अविनयों (धृष्टताओं) का आयतन (निवासस्थान) है,

---

१. शौचवध्यो रागमलावलेपः, बाध्यो बलवान्। २. इत्यतः। ३. अभिधीयसे। ४. महती।

अविनयानामेकैकमप्येषामायतनम्,किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालन-निर्म्मलापि[1] कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागेव[2] भवति यूनां दृष्टिः। अपहरति च वात्येव शुष्कपत्त्रं समुद्भूतरजोभ्रान्तिरतिदूरमात्मेच्छया[3] यौवनसमये पुरुषं प्रकृतिः।

अविनयानामिति। एषाम् = पूर्वोक्तानां गर्भेश्वरत्वादीनाम्, मध्ये, एकैकम् = प्रत्येकम्, अपि, अविनयानाम् = धृष्टतानाम्, अशिष्टाचाराणाम्, आयतनम् = निवासस्थानम्, समवायः = समुदायः, किमुत = किं वक्तव्यमिति भावः। एषु एकमपि विनाशायालम्, यदि दौर्भाग्याच्चत्वारि यत्र वसन्ति तत्र तु न किमपि वक्तव्यमवशिष्यते इति भावः। अत एवोक्तं नीतिग्रन्थे विष्णुशर्मणा—यौवनं धन-सम्पत्तिः प्रभुत्वमविवेकिता। एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्।"

यौवनारम्भ इति। यौवनारम्भे = तारुण्यस्य आरम्भकाले, प्रायः = बाहुल्येन, शास्त्रेत्यादिः—शास्त्राणि (= आन्वीक्षिक्यादिविद्याः) एव जलम् (= वारि) तेन यत् प्रक्षालनम् (= धावनम्, परिमार्जनम्) तेन हेतुना निर्मला (= कालुष्यरहिता स्वच्छा) अपि बुद्धिः (= मतिः) कालुष्यम् (= कलुषताम्, वैपरीत्यम्) उपयाति (= गच्छति), शास्त्रज्ञानजन्यबुद्धिविकासो नश्यतीति भावः। अत्र रूपकं विरोधाभासश्चेत्यनयोः अङ्गाङ्गिभावेन सङ्करः।

अनुज्झितेति। अनुज्झितधवलता—अनुज्झिता (= अपरित्यक्ता) धवलता (= शुभ्रता) यया सा तादृशी, अपि, यूनाम् = तरुणानाम्, दृष्टिः = नेत्रम्, सरागा—रागेण (= लौहित्येन) सहिता एव, भवति। अत्रार्थे विरोधः, अस्य परिहारस्तु—रागेण (= अनुरागेण, विषयाभिलाषेण) सहिता भवति। एवञ्च विरोधाभासोऽलङ्कारः।

अपहरतीति। च शब्दःकिञ्चेत्यर्थे। यौवनसमये = तारुण्यकाले, समुद्भूतरजो-भ्रान्तिः-समुद्भूता (= समुत्पन्ना) रजसाम् (= धूलिकणानाम्) भ्रान्तिः (= भ्रमणम्) यस्यां सा तादृशी, वात्या = वातसमूहः, इव, समुद्भूतरजोभ्रान्तिः—समुद्भूता (= समुत्पन्ना) रजसा (= रजोगुणेन) भ्रान्तिः (= भ्रमः) यस्यां सा तादृशी, प्रकृतिः = स्वभावः, मनोवृत्तिः, पुरुषम् = मनुष्यम्, आत्मेच्छया = निजेच्छया, अतिदूरम् = अतिविप्रकृष्टम्, अनिष्टकारिस्थानपर्यन्तम्, अपहरति = प्रापयति। अत्रोपमा। [वातानां समूहः—इत्यर्थे 'पाशादिभ्यो यः (४।२।४९) इति सूत्रेण यप्रत्यये अल्लोपे टापि च वात्येति साधुः।] आत्मेच्छया—इत्यत्रात्मना प्रकृतेः परामर्शः।

फिर [इन चारों के] समूह का तो कहना ही क्या ? और यौवन के प्रारम्भ में प्रायः शास्त्र (-अध्ययन) रूपी जल के प्रक्षालन से निर्मल होती हुई भी बुद्धि कलुषता (दूषण) को प्राप्त हो जाती है, मैली हो जाती है। युवकों की दृष्टि [अपनी] धवलता को न छोड़ती हुई भी सरागा (१-लालिमा, २-प्रेम से युक्त) ही होती है। जिस प्रकार वात्या = बवण्डर रजः (धूलि) की भ्रान्ति(चक्कार) से युक्त होती हुई अपनी इच्छा से सूखे पत्ते को बहुत दूर तक उड़ा कर ले जाती है उसी प्रकार यौवन के समय में प्रकृति (स्वभाव), मनोवृत्ति (जिसमें रजोगुण के कारण भ्रान्तियाँ उत्पन्न हो जाती है), पुरुष को अपनी (अर्थात् प्रकृति की) इच्छानुसार दूर तक ले जाती है। [जैसे सूखा पत्ता वातसमूह के गोल चक्कर में फँसकर बहुत दूर तक उड़ता चला जाता है। वैसे ही यौवन में रजोगुण से उत्पन्न भ्रान्ति वाली प्रकृति

---

१. धवलापि। २. सरागैव। ३. अदूरम्, दूरम्।

इन्द्रियहरिण-हारिणी[1] च सततदुरन्तेयमुपभोगमृगतृष्णिका[2]। नवयौवनकषायितात्मनश्च सलिलानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः। नाशयति च दिङ्मोह इवोन्मार्गप्रवर्त्तकः पुरुषमत्यासङ्गो विषयेषु। भवादृशा एव भवन्ति भाजनान्युप-[3]

इन्द्रियेति। च शब्दः किञ्चेत्यर्थे। इन्द्रियेत्यादिः—इन्द्रियाणि (=हृषीकाणि) एव हरिणाः (=मृगाः) तान् हरति (=आकर्षति) इति तादृशी इयम्=सन्निकटस्था, उपभोगमृगतृष्णिका—उपभोगः (=कामिन्यादिसंभोगभिलाषः) एव मृगतृष्णिका (=मरीचिका) सततदुरन्ता—सततम् (=निरन्तरम्) दुरन्ता (=दुःखावसाना)। मरुभूमौ मध्याह्ने तृषार्त्ताः हरिणाः रविकिरणेषु जलभ्रान्त्या धावन्ति किन्तु धावन्तोऽन्ते जलमलभमानाः म्रियन्ते तथैव मानवानामिन्द्रियाण्यपि विषयान् प्रति धावन्ति सन्ति दुःखमेव जनयन्ति। अत्र परम्परितरूपकालङ्कारो बोध्यः।

नवेति। नवेत्यादिः—नवयौवनेन (=अभिनवतारुण्येन) कषायितः (= विपरिवर्तितः, विकृतः) आत्मा (=स्वरूपम्) यस्य तस्य तादृशस्य पुरुषस्येति शेषः यद्वा आत्मनः=मनसः=चित्तस्य, सलिलानि=जलानि, इव, तानि=पूर्वानुभूतानि, प्रथितानि, एव, विषयस्वरूपाणि=भोग्यवस्तूनि शब्दस्पर्शादीनि आस्वाद्यमानानि=उपभुज्यमानानि सन्ति, मधुरतराणि=अतिशयेन सुरसानि, आपतन्ति= आपाततः प्रतीयन्ते। यथा कश्चन जनो हरीतक्यादिभक्षणेन कषायितायां जिह्वायां पीयमानममधुरमपि सलिलं मधुरमनुभवति तथैव नवयौवनेन कषायिते चेतसि वस्तुतोऽमधुरा हानिकरा अपि विषया आस्वाद्यमानाः मधुरा एव प्रतीयन्ते, कदाचित्तु मधुरतरा अनुभूयन्ते। अत्रोपमा स्पष्टा।

का तेन हानिरिति चेदाह—**नाशयतीति।** च=किञ्च। उन्मार्गप्रवर्त्तकः—उन्मार्गे (= कुपथे) प्रवर्त्तकः (=प्रेरकः) दिङ्मोहः=दिशाभ्रान्तिः, इव=यथा, विषयेषु=चन्दनवनितादिषु, अत्यासङ्गः= अतीवासक्तिः, पुरुषम्=मनुष्यम्, नाशयति=नष्टं करोति, अधः पातयतीति भावः। दिङ्मोहो यथाऽनभिप्रेतपथे पुरुषं नीत्वा तं नाशयति पीडयति तथैव विषयेषु अतितरामासक्तिरपि पुरुषमनुचितदेशं प्रापय्याधः पातयतीति साम्यादुपमा।

भवादृशा इति। भवादृशाः=भवत्सदृशाः, सुयोग्या इत्यर्थः, एव, उपदेशानाम्=समुचित-शिक्षाणाम्, भाजनानि=पात्राणि, भवन्ति=विद्यन्ते, नान्ये इति भावः। उचिते पात्रे एव दीयमानं

पुरुष को विवश करके इधर उधर अनिष्ट स्थानों पर पहुँचा देती है।] और इन्द्रिय रूपी हिरनों को हर लेने वाली यह उपभोगरूपी मृगतृष्णा निरन्तर दुरन्ता=कष्ट से समाप्त होनेवाली या बुरे परिणाम वाली होती है। नये यौवन से कसैले चित्तवाले पुरुष के मन को जल के समान भोग किये जाते हुये विषयों के स्वरूप और अधिक मीठे (मनोहर) प्रतीत होते हैं। [जैसे कोई व्यक्ति हर्रा आदि कसैली चीज खाने के बाद पानी पीता है तो वही पानी और अधिक मीठा लगने लगता है वैसे ही यौवन में अन्तःकरण कसैला हो जाने से उन्हीं विषयों का आनन्द और अधिक प्रतीत होने लगता है।] गलत मार्ग पर ले जाने वाले दिङ्मोह (दिशासम्बन्धी अज्ञान या भ्रम) के समान ही विषयों (स्त्री-सम्पर्कादि) में अत्यासक्ति भी पुरुष को कुत्सित मार्ग में ले जाने वाली होती हुई, उसका विनाश

१. इन्द्रियहरिणहरती च। २. सततमतिदुरन्ते इवं दूरं नयत्युपभोग०। ३. भाजनम्।

द्देशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेनोपदेशगुणाः।[1] गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु[2] करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति। हरत्यतिमलिनमन्धकारमिव[3] दोषजातं प्रदोषसमयनिशाकर इव। गुरूपदेशः प्रशमहेतुर्वयः[4]परिणाम इव पलितरूपेण

ज्ञानं फलति। कथमिति चेत्तत्राह—अपगतेति। हि = यतः, अपगतमले—अपगतम् (= दूरीभूतम्, विनष्टम्) मलम् (= कालुष्यम्) यस्मात् तस्मिन् तादृशे, स्फटिकमणौ = स्फटिकरत्ने, रजनिकर-गभस्तयः = चन्द्ररश्मयः, इव, अपगतमले, मनसि = चित्ते, उपदेशगुणाः = शिक्षणगुणाः, सुखेन = अनायासेन, विशन्ति = प्रविशन्ति। यथा निर्मले स्फटिकमणौ चन्द्रकिरणानां सुखेन प्रवेशो भवति तथैव निर्मले एव मनसि शिक्षाया गुणानामपि प्रवेशो भवति। साम्यप्रतिपादनादुपमा।

गुरुवचनमिति। गुरुवचनम्—गुरुः (= हिताहितोपदेष्टा शुभचिन्तकः) तस्य वचनम् (= वाक्यम्, शिक्षणम्) अमलम् (= निर्मलम्), सद् अपि, अभव्यस्य = असाधोः, नीचस्येति भावः, श्रवणस्थितम् = श्रोत्रगतम्, सलिलम् = जलम्, इव, महत् = अतिशयम्, शूलम् = वेदनाम्, उपजनयति = उत्पादयति। यथा श्रोत्रपतितं निर्मलमपि सलिलं महत् कष्टं जनयति तथैव निकृष्टजनस्य कर्णगतं हितकरममलमपि गुरोः शिक्षणं तस्य कष्टप्रदमेव भवतीति भावः। अत्रोपमा।

इतरस्येति। इतरस्य = अभव्यभिन्नस्य योग्यस्येति भावः, तु, गुरुवचनमिति शेषः, करिणः = गजस्य, शङ्खाभरणम् = कम्बुविभूषणम्, इव, अधिकतरम् = प्रचुरतरम्, आननशोभासमुदयम् = मुखसौन्दर्य-संघातम्, उपजनयति = उत्पादयति। अत्रोपमा। अत्र प्रायशो व्याख्यासु "आननशोभासमुदयम् = मुख-कान्त्युत्पत्तिम्, वदनसौन्दर्योत्पत्तिम्' इति समुदयशब्द उत्पत्त्यर्थकोऽवलोक्यते। परन्तु नैतदुचितम् 'उपजनयती'ति क्रियापदेन पौनरुक्त्यापत्तेः। अतः "समुदायः समुदयः समवायश्चयो गणः।' २।५।४० इत्यमरानुसारं समूहार्थक एव 'समुदय' शब्दोऽत्र बोध्यः।

हरतीति। अस्मिन्नपि वाक्ये 'गुरुवचनम्' इति कर्तृत्वेन सम्बध्यते। प्रदोषेत्यादिः—प्रदोषसमये (= रजनीमुखकाले) यः निशाकरः (= चन्द्रः), स इव, गुरुवचनम्, अतिमलिनम् = अत्यन्तमलीमसम्, अन्धकारम् = तमः, इव, दोषजातम् = कामक्रोधादि-दोषसमूहम्, हरति = दूरीकरोति। अत्र द्विः प्रयुक्त इव शब्दो गुरुवचनस्य अन्धकारस्य च साम्यं प्रतिपादयति। तेनोपमा बोध्या।

पूर्वोक्तमेव प्रकारान्तरेण वर्णयति—गुरुपदेश इति। प्रशमहेतुः—प्रशमः (= कामादिविकार-प्रशमनम्) तस्य हेतुः (= कारणम्), वयः परिणामः = अवस्थापरिणतिः, वार्धक्यम्, शिरसिज-जालम् =

(पतन) कर देती है। जैसे निर्मल स्फटिकमणि में चन्द्रमा की किरणें सरलता से प्रविष्ट हो जाती हैं वैसे ही निर्मल (सांसारिक विकार-रहित) मन में [गुरुओं के] उपदेश के गुण अनायास प्रविष्ट हो जाते हैं (प्रभाव डालते हैं)। जैसे जल [स्वतः] निर्मल [होता हुआ भी] कान में स्थित [पहुँचा हुआ] अत्यन्त वेदना उत्पन्न करता है वैसे ही गुरु का उपदेश (वचन) निर्मल (हितकारक) होता हुआ भी अभव्य (दुष्ट, निकृष्ट) व्यक्ति के कान में स्थित (पहुँचा हुआ) अत्यन्त पीड़ा उत्पन्न करता है। परन्तु [वही गुरूपदेश] अभव्य से भिन्न अर्थात् सज्जन (विवेकशील) व्यक्ति के मुख की और अधिक शोभा वैसे ही बढ़ाता है जैसे शङ्खनिर्मित आभूषण हाथी के मुख के सौन्दर्यसमूह को उत्पन्न करता है। और जैसे रात्रि के प्रारम्भकाल का चन्द्रमा अत्यधिक मलिन भी अंधकार को दूर कर देता

१. सुखम्। २. च। ३. हरति च सकलम्०। ४. क्वचित्तु 'वयः' पदं नास्ति।

शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति। अयमेव चानास्वादित-विषय-रसस्य ते काल उपदेशस्य। कुसुमशर-शर-प्रहार[1][2]जर्जरिते [3]हि [4]हृदि जलमिव गलत्युपदिष्टम्। अकारणञ्च भवति दुष्प्रकृतेरन्वयः [5]श्रुतं वाविनयस्य। [6]चन्दनप्रभवो न दहति किमनलः? किंवा

शिरःस्थितकेशराशिम्, अमलीकुर्वन् = स्वच्छीकुर्वन्, तदेव = शिरसिजजालम् एव, पलितरूपेण = वार्धक्य-हेतुकशुक्लत्वरूपेण, परिणमयति = परिपाकं नयति। तद्वत्, प्रशमहेतुः—प्रशमः (= अन्तरिन्द्रियनिग्रहः) तस्य हेतुः (= कारणम्) गुरूपदेशः = गुरुशिक्षा, दूषणजातम्, अमलीकुर्वन् तदेव = दूषणजातमेव, गुणरूपेण = दयादाक्षिण्यादि-गुणरूपेण, परिणमयति = परिवर्त्तयति। अत्र वयः परिणामेन वार्धक्येन सह गुरूपदेशस्य साम्यं प्रतिपादयति। यथा कामादिविकार-प्रशमन-हेतुः वयःपरिणामः (वार्धक्यम्) केशसमूहं निर्मलीकुर्वन् तमेव केशसमूहं पलितरूपेण परिणमयति तथैव प्रशमहेतुः (= अन्तरिन्द्रिय-निग्रहकारणीभूतः)गुरूपदेशोऽपि दोषजातममलीकुर्वन् तदेव च गुणरूपेण परिणमयतीति भावः। उपमात्र।

समयान्तरे उपदेशकरण-सम्भवे सत्यपीदानीमेव कथमुपदिश्यते इति चेत्तत्राह—**अयमेवेति**। अनास्वादितेत्यादिः—अनास्वादितः (= नानुभूतः) विषयाणाम् (= रूपरसादीनाम्) रसः (= आस्वादः) येन तस्य तादृशस्य, ते = तव, उपदेशस्य = शिक्षणस्य, अयम् = एषः, एव, कालः = समयः। यौवराज्येऽभिषिक्ते तु कृतविषयरसास्वादस्य ते उपदेशो व्यर्थ एव भविष्यतीति भावः।

आस्वादितविषयरस्योपदेशे का क्षतिरित्यत आह—**कुसुमशरेति**। हि = यतः, कुसुमशरेत्यादिः—कुसुमशरः (= कामदेवः) तस्य ये शराः (= बाणाः) तेषां प्रहारेण (= आघातेन) जर्जरितम् (= जीर्णम्, विदीर्णम्) तस्मिन् तादृशे, हृदि = हृदये, उपदिष्टम् = शिक्षितम्, गुरुवचनम्, सलिलम् = जलम् इव, गलति = क्षरति, निरर्थकं भवतीति भावः। चालन्यां यथा जलं स्थापयितुं न शक्यते तथैव अनङ्गबाण-प्रहार-विदीर्णे हृदये गुरूपदेशः स्थातुं न शक्नोतीति भावः। अत्रोपमा।

किमुत्तमकुलोत्पन्नां गृहीतशिक्षाणामपि सामान्यैव स्थितिरित्यत आह—**अकारणमिति**। च = किञ्चेत्यर्थे। दुष्प्रकृतेः = दुरात्मनः, असत्स्वभावस्य, अन्वयः = सद्वंशः, वा = अथवा, श्रुतम् = शास्त्रज्ञानम्, विनयस्य = सन्मार्गप्रवृत्तेः, अकारणम् = अहेतुः भवति, हेतुर्न भवतीति भावः। क्वचित्तु—"··· श्रुतं वाऽविनयस्य" इति पाठः। अत्र दुष्प्रकृतेः अविनयस्य = नम्रतारहितस्य पुरुषस्य--इत्यादि पूर्ववत् व्याख्या कार्या। 'स्वभावो मूर्ध्नि वर्तते।'' "न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः। स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः॥" प्रभृतिभिर्वचनैः स्वभावस्यैव प्राधान्यं प्रतिपाद्यते न कुलस्य न वाध्ययनस्येति बोध्यम्।

स्वोक्तमर्थं समर्थयते—**चन्दनेत्यादिना**। चन्दनप्रभवः—चन्दनात् (=मलयजात् वृक्षात्) प्रभवति

है वैसे ही [गुरुवचन भी] अति मलिन (अत्यन्त निकृष्ट भी) दोषसमूह को दूर कर देता है [अज्ञान रूपी अंधकार को हटा देता है।] जैसे प्रशम अर्थात् कामादिविकारों के शान्त करने का कारणभूत अवस्था का परिणाम अर्थात् बुढापा सिर के केशों के समूह को अमल = सफेद करता हुआ उन्हीं केशों को [ज्येष्ठता और अनुभवशीलता आदि] गुण के रूप से परिणत कर देता है वैसे ही प्रशमहेतु। अन्तरिन्द्रिय-निग्रह का कारणभूत) गुरु का उपदेश [उस दोषसमूह को निर्मल करता हुआ] उसी को गुण रूप से बदल देता है। और सांसारिक विषयों के आस्वाद (उपभोग) से रहित आपके लिये उपदेश का यही उचित समय है। क्योंकि कामदेव के बाणों के प्रहार से जर्जरित (बेधे गये)

1. कुसुमशर-प्रहार०। 2. ···संप्रहार०। 3. 'हि' इति नापि विद्यते। 4. हृदये। 5. श्रुतं वाऽविनयस्य। 6. चन्दनप्रभवोऽपि।

प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा ? गुरूपदेशश्च नाम पुरुषाणामखिल-मलप्रक्षालनक्षममजलं स्नानम्[1], अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं[2] गुरूकरणम्, असुवर्णविरचनमग्राम्यं[3] कर्णाभरणम्, अतीतज्योतिरालोकः, नोद्वेगकरः[4] प्रजागरः।

(=सङ्घर्षेण उत्पद्यते) इति चन्दनप्रभवः, अनलः =अग्निः, किं न =नैव, दहति =ज्वलयति, भस्मसात् करोति ? अपि तु दहत्येव । चन्दनं तु शीतलं किन्तु तस्माज्जातोऽग्निस्तु तद्विपरीतो दाहक एव। वा =अथवा, प्रशमहेतुना=तापशमनकारणीभूतेन, अपि, वारिणा =जलेन, वाडवानलः = वडवाग्निः, किं न =नैव, प्रचण्डतरीभवति = प्रबलतरीभवति ? अपि तु भवत्येव । एवमेव शास्त्रज्ञानं विनयस्य कारणं नापि भवति। अत्रापि स्वभावस्यैव प्राधान्यं दृश्यते ।

प्रकारान्तरेण पुनरपि गुरुवचनानां महत्त्वं निरूपयति—**गुरूपदेशश्चेति** । च शब्दः किञ्चेत्यर्थे। गुरूपदेशः—गुरूणाम् (=हिताहितप्राप्तिपरिहारोपदेशकानाम्) उपदेशः (=शिक्षणम्) नाम =इदं प्रसिद्धौ, पुरुषाणाम् =मनुष्याणाम्, अखिलमल-प्रक्षालन-क्षमम्—अखिलम् (=समस्तम्) यत् मलम् (=कालुष्यम्) तस्य प्रक्षालने (=धावने,स्वच्छीकरणे) क्षमम् (=समर्थम्) अजलम् =जलभिन्नम्, स्नानम् =मज्जनम् । अन्यत् स्नानं तु जलसहितमेव भवतीत्यस्योत्कृष्टत्वं बोध्यम् ।

अनुपजातेति । गुरूपदेशः—इति सर्वत्र योज्यम्, अनुपजातेत्यादिः—अनुपजातम् (=अनुत्पन्नम्) पलितादि (=वार्धक्यमूलककेशश्वेतत्वादि) **वैरूप्यम्** (=विरूपता) यस्मिन् तादृशम्, अथ च अजरम्—अविद्यमाना (= न वर्तमाना) जरा (= जीर्णता) यस्मिन् तादृशम्, वृद्धत्वम् = स्थविरत्वम्। अन्यत्प्रसिद्धं वृद्धत्वन्तु उपजातपलितादि-वैरूप्यमथ च सजरं भवतीत्यस्योत्कृष्टत्वम्, सदसद्विवेकोत्पादनादस्य वैलक्षण्यमपीति भावः। अस्मिन् विषये महर्षिमनुरुवाच—"न तेन वृद्धो भवति येनास्य पलितं शिरः। यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः ॥ [मनुः]

अनारोपितेति । गुरूपदेशः, अनारोपितेत्यादिः—अनारोपितः (=अविहितः, अनुत्पादितः वा) मेदसः (=वसायाः) दोषः (=दुर्गुणः, स्थूलत्व-तुन्दिलत्वादिः) येन यस्मिन् वा तादृशम्, गुरूकरणम् = स्थूलीकरणम्, गौरवहेतुस्वरूपः, अन्यत्र गुरूकरणे मेदोदोषः स्थूलत्वादिः भवत्येवेत्यस्य वैलक्षण्यम् ।

असुवर्णेति । गुरूपदेशः, असुवर्णविरचनम् =अविद्यमाना सुवर्णेन =काञ्चनेन, विरचना= निर्माणम्, यस्य यस्मिन् वा, तत् तादृशम् अग्राम्यम् =ग्राम्यत्वदोषशून्यम्, नागरिकमिति भावः, कर्णाभरणम् = श्रवणाभूषणम् । अन्यत् कर्णाभरणन्तु स्वर्णनिर्मितं ग्राम्यत्वादि-दोषविशिष्टमपि भवति। गुरूपदेशस्तु केवलं श्रुतिमात्रेणैव श्रोत्रशोभां वर्द्धयति वैदग्ध्यादि-सम्पादनद्वारेति अस्योत्कृष्टत्वम् ।

हृदय में उपदेश उसी प्रकार बह जाता है जैसे छिद्रयुक्त पात्र में पानी । दुष्ट प्रकृति वाले के लिए उत्तम कुल और अध्ययन विनय के कारण नहीं होते हैं अर्थात् उच्चकुल में पैदा हुआ है अथवा बहुत पढ़ा है इसलिए विनयी ही होगा—ऐसा नियम नहीं है । क्योंकि चन्दन की लकड़ी से उत्पन्न होनेवाली आग क्या नहीं जलाती है ? अथवा आग को शान्त करने के कारणभूत भी जल द्वारा क्या बड़वानल और अधिक प्रचण्ड नहीं होता है ? गुरु का उपदेश सभी दोषों को दूर करने में समर्थ बिना जल का स्नान है । जिसमें श्वेतकेशता (=बालों का सफेद होना) आदि कोई [शारीरिक] विकार नहीं उत्पन्न होता है ऐसा बुढ़ापे से रहित वृद्धत्व (वृद्ध होना) है । मेदोदोष (चरबी) को न

१. अजलस्नानम् । २. मददोषम् । ३. विरचना ग्राह्यम् । ४. अपनीत० ।

विशेषेण राज्ञाम्[1]। विरला हि तेषामुपदेष्टारः। प्रतिशब्दक[2] इव राजवचनमनुगच्छति जनो भयात्। उद्दाम-दर्पाश्च[3] पृथुस्थगित-श्रवणविवराश्चोपदिश्यमानमपि[4] ते न शृण्वन्ति। शृण्वन्तोऽपि

प्रतीतेति। गुरूपदेशः, अतीतज्योतिः—अतीतम् (=गतम्) ज्योतिः (=प्रकाशः) यस्मात् तादृशः आलोकः (=प्रकाशः)। अयमुपदेशो ज्योतिर्विनापि सर्वाधिकं प्रकाशं जनयतीति भावः। ज्योतिः शब्दस्य नित्यनपुंसकत्वेम पुंसि केषाञ्चनोल्लेखः प्रामादिक एवेति बोध्यम्।

नोद्वेगेति। नोद्वेगकरः—न (=नैव) उद्वेगकरः (=सन्तापकारकः) प्रजागरः=अतिशय-जागरणम्। अन्यत्र प्रजागरे तु मानसी शारीरिकी च व्यथा भवति। गुरूपदेशेन यो जागरः=प्रबोधो भवति तेन तु अज्ञानादिजन्याः पीडा विनश्यन्तीति अस्य वैलक्षण्यम्। अजलस्नानमित्याद्यारभ्य प्रजागर-इत्यन्तं सर्वत्र उपमेये गुरूपदेशे उपमानानां स्नानादीनां तत्तद्वैशिष्ट्यरूपकमलङ्कारो बोध्यः।

अयमुपदेशो न केवलं तवैवेत्यत आह—**विशेषेणेति**। एते पूर्वोक्ता उपदेशाः,राज्ञाम्=नृपाणाम्, विशेषेण=आधिक्येन,प्रदातव्याः। कथमिति चेत्तत्राह—**हीति**। हि=यतः,तेषाम्,राज्ञामित्यर्थः,उपदेष्टारः= उपदेशकाः उपदेशप्रदानशक्तिमन्त इति भावः, बिरलाः = स्वल्पा, एव भवन्ति। कोऽत्र हेतुरित्यत आह—**प्रतिशब्दक इति**। जनः=लोकः, जातावेकवचनम्, भयात्=भीतेः, राजवचनम्=नृपकथनम्, प्रतिशब्दकः=प्रतिध्वनिः, इव=यथा, अनुगच्छति=अनुव्रजति। अनुचिते सत्यपि तस्य प्रत्युत्तरं दातुं न प्रभवति। अत एव नृपोपदेशकानां विरलत्वं बोध्यम्।

यदि कश्चिन्निर्भीकः सन् हिताय उपदेष्टुं प्रयतेत एव तर्हि को दोष इत्यत आह—**उद्दामेति**। उद्दामदर्पाः—उद्दामा (=उत्कटाः) दर्पाः (=अहङ्काराः) येषां ते तादृशाः, पृथुस्थगितेत्यादिः—पृथु (=बहु यथा स्यात् तथा) स्थगिते (=आच्छादिते, संवृते) श्रवणविवरे (=श्रोत्ररन्ध्रे) येषां ते तादृशाश्च सन्तः, ते=राजानः, उपदिश्यमानम्=कथ्यमानम्, अपि, गुर्वादिभिरिति शेषः, न=नैव, शृण्वन्ति=आकर्णयन्ति। यथा लोके शोथेन कर्णविवरे अवरुद्धे सति श्रोतुं न शक्यते तथैव राजानोपि अहंकारातिशयेन श्रवणशक्तिहीनाः सम्पद्यन्ते इति भावः। अत्र चकारद्वय-प्रयोग एककालं सूचयतीति बोध्यम्।

ननूपदेशसमये तत्र विद्यमाना उपदेशदायिनमवारयन्तोऽपि राजानः कथं नाकर्णयन्तीत्यत आह—**शृण्वन्त इति**। शृण्वन्तः=आकर्णयन्तः, अपि, ते गुरूपदेशानिति शेषः,गजनिमीलितेन—गजः (=करी)

उत्पन्न करनेवाला गुरूकरण (१-भारी बना देना, २-महत्त्वपूर्ण बना देना) है। जिसकी स्वर्ण से रचना नहीं होती है ऐसा ग्राम्यत्व (=गवांरपन) से रहित [श्रोताओं के] कान का आभूषण है। अर्थात् कान का आभूषण होने पर भी सोने से निर्मित नहीं है और न अशोभनीय है। [भौतिक] ज्योति से रहित प्रकाश है। अर्थात् ज्वालायुक्त न होता हुआ भी प्रकाश है। और उद्वेग (= थकान, व्याकुलता) न करनेवाला प्रबोध (जागरण) है। [अन्यत्र जागरण में उद्वेग होता है किन्तु गुरूपदेश से जो प्रबोध=जागरण हाता है वह कल्याणकारी ही होता है।] और [यह गुरूपदेश] विशेष रूप से राजाओं के लिए हैं क्योंकि उनको उपदेश देनेवाले बिरल (बहुत कम) ही होते हैं। कारण यह है कि भय से लोग राजा के वचनों का प्रतिध्वनि के समान पालन (अनुसरण) करते हैं। उत्कट अहंकारवाले

१. अत्र 'तु' इत्यधिकोपि पाठः। २. एव।

३. उद्दामदर्पश्वयथुस्थगित०, उद्दामदर्पाश्च पृथुस्थगित-दर्पाश्चर्यसंस्थगित। ४. उपदिश्यमपि।

च गजनिमीलितेनावधीरयन्तः[1] खेदयन्ति हितोपदेशदायिनो गुरून् । अहङ्कार-दाहज्वर-मूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः, अलोकाभिमानोन्मादकारीणि धनानि, राज्य-विषविकार-तन्द्राप्रदा[2] राजलक्ष्मीः[3] ।

आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम् । इयं हि खड्गमण्ड[4]लोत्पल-वन-विभ्रम-भ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादे-

---

तद्वत् यत् निमीलितम् (=नेत्रसङ्कोचनम्) तेन । [वस्तुतस्तु—गजनिमीलितमिव यत् निमीलितं तेन—इत्येव व्याख्यानमुचितम् ।] अवधीरयन्तः = अवहेलयन्तः, उपदेशमिति शेषः, हितोपदेशदायिनः= कल्याणप्रदशिक्षाप्रदायकान्, गुरून् = शिक्षकान्, खेदयन्ति = क्लेशं प्रापयन्ति, तदुपदेशावज्ञासम्पादनेनेति भावः । अत्र लुप्तोपमा ।

राजस्वभावमाह—अहङ्कारेति । हि = यस्मात्, राजप्रकृतिः = नृपस्वभावः, अहङ्कारेत्यादिः—अहङ्कारः (=अभिमानः) एव दाहज्वरः (=तीव्रतापः) तेन या मूर्च्छा (=मोहः) तया अन्धकारिता (=अन्धकार इवाचरिता, सञ्जातान्धकारा, सदसद्विवेकशून्येति भावः), अत एव, विह्वला= विक्लवा चञ्चला वा । धनानि = सम्पत्तयः, अलीकेत्यादिः—अलीकः (= मिथ्या) योऽभिमानः (=दर्पः) उन्मादः (=उन्मत्तता) च तौ कर्तुं शीलं येषां तानि तादृशानि । यद्वा—अलीकाभिमानेन उन्मादकारीणि धनानि । राजलक्ष्मीः = राजश्रीः, राज्येत्यादिः—राज्यम् (=आधिपत्यम्) एव विषम् (=गरलम्) तस्माद् यो विकारः (=विकृतिः) तेन या तन्द्रा (=प्रमीला) तां प्रददातीति सा तादृशी । एतैः कारणैरेव राजानः पूर्वोक्तानि विचित्राणि रूपाणि धारयन्तीति भावः। अत एव राज्ञामुपदेशस्य परमावश्यकता वर्तते । भवांश्च शीघ्रमेव आधिपत्ये अभिषिक्तो भविष्यतीतीदानीमेवोपदेशौचित्यं भवतीति शुकनासस्याशयः ।

इदानीं लक्ष्मीस्वभाववर्णनमाध्यमेन तस्या वैलक्षण्यं प्रतिपादयति—आलोकयत्वित्यादिना। कल्याणाभिनिवेशी—कल्याणम् (= मङ्गलम्) अभिनिविशते (=आग्रहं करोति) इति तच्छीलः मङ्गलविषयकाग्रहवान् भवान्, प्रथमम् = आदौ, तावत् = इदं वाक्यालंकारे, लक्ष्मीम् = श्रियम्, एव, पश्यतु = विलोकयतु ।

इयमिति । हि = यतः, खड्गेत्यादिः—खड्गमण्डलम् (=असिसमूहः) एव उत्पलवनम् (=कमलकाननम्) तस्मिन् यो विभ्रमः (= विचरणम्), तत्र भ्रमरी (=मधुकरी, तत्तुल्येति भावः), इयम् = एषा, निरूप्यमाना, लक्ष्मीः = श्रीः, पारिजातपल्लवेभ्यः = कल्पवृक्षकिसलयेभ्यः, रागम्=

और [दर्परूपी शोथ=सूजन से] जिनके कर्णछिद्र अच्छी तरह से रुँधे हुए हैं ऐसे [राजा लोग] दिए जाते हुए भी उपदेश को नहीं सुनते हैं । और सुनते हुए भी हाथी के आँख बन्द कर लेने के समान अर्थात् उनकी पूर्ण उपेक्षा करते हुए उन हितकारी उपदेश देनेवाले गुरुओं को दुःखी करते हैं । अहंकाररूपी दाहक ज्वर से उत्पन्न मूर्च्छा (अचेतनता) से अन्धकारयुक्त (अज्ञानी) बनी राजप्रकृति (राजस्वभाव) विह्वल रहती है, परेशान रहती है । धन झूठे अभिमान और उन्माद को उत्पन्न करानेवाले होते हैं। और राजलक्ष्मी राज्यविषरूपी विकार से उत्पन्न तन्द्रा (आलस्य) को देने वाली(उत्पन्न करनेवाली) है।

कल्याण [-कारक कार्यों] में आग्रह रखनेवाले [प्रिय चन्द्रापीड आप] पहले लक्ष्मी को ही देख लें । यह लक्ष्मी जो मानों [शूर वीर योद्धाओं की] तलवारों के कमलवन में विचरण करनेवाली भौंरी है जो साथ में रहने के परिचय के कारण क्षीरसमुद्र से [बाहर आते समय]—पारिजात (कल्प वृक्ष) के पत्तों से राग (=१-लालिमा, २–आसक्ति), चन्द्रमा की कला से पूर्ण वक्रता (१-टेढ़ापन,

---

१. अवधारयन्तः । २.··· तन्द्राप्रदा, विषतन्त्रीः । ३. राज्यलक्ष्मीः । ४. क्वापि 'सुभट' इत्यधिकम् ।

कान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभ-मणेर्नैष्ठुर्य्यम्[1],— इत्येतानि सहवास-परिचयवशाद्विरहविनोदचिह्नानि गृहीत्वेवोद्गता[2]।

नह्येवंविधमपरिचितमिह[3] जगति किञ्चिदस्ति[4], यथेयमनार्य्या[5]। लब्धापि खलु दुःखेन परिपाल्यते। दृढगुण-सन्दान-निष्पन्दीकृतापि[6] नश्यति। उद्दाम-दर्प-भटसहस्रोल्लासिता-[7]

रक्तिमानम्, विषयाभिलाषं च, 'गृहीत्वा इवोद्गता' इति मुख्यं वाक्यं सर्वत्र योज्यम्। [यथा कश्चन लोकः स्थानान्तरं गन्तुं प्रवर्तते तदा सहवासजनितपरिचयात् तत्तद् वैशिष्ट्यमपि स्वसार्धं नयति। एवमेव क्षीरसागरे निवासकाले स्वसहवासिनां यानि वैशिष्ट्यानि तानि सर्वाणि नीत्वेव लक्ष्मीः क्षीरसागरात् प्रादुर्भूतेति भावः। अत एव क्षीरसागरस्थितानां सर्वेषां वैशिष्ट्यमत्र प्रदर्शयति।] इन्दुशकलात् = चन्द्र-खण्डात्, एकान्तवक्रताम् = नितान्तकुटिलताम्, प्रतिकूलताम् च, उच्चैःश्रवसः=इन्द्रवाहनीभूतादश्वविशेषात्, चञ्चलताम् = चपलताम्, अल्पकालस्थायित्वम्, च। कालकूटात् = कालकूटनामकविष-विशेषात्, मोहन-शक्तिम् = मूर्च्छोत्पादनसामर्थ्यम्, अन्यवशीकरणशक्तिं च। मदिरायाः = मद्यात्, मदम् = उन्मादकत्वम्, औद्धत्यं च। कौस्तुभमणेः = कौस्तुभाख्यरत्नात्, नैष्ठुर्यम् = काठिन्यं निर्दयत्वं च। इति = पूर्वोक्तानि, एतानि = रागादीनि, सहवास-परिचयवशात् = एकत्रावस्थानप्रणयवशात्, विरहविनोदचिह्नानि—विरहस्य (= पारिजातपल्लवादिभ्यो वियोगस्य) विनोदचिह्नानि (= अपनोदनचिह्नभूतानि) गृहीत्वा = आदाय, इव, क्षीरसागरात् = दुग्धसमुद्रात्, उद्गता = उत्थिता, बहिरागता। क्वचित्तु 'गृहीत्वैव' इति पाठः। अत्र गृहीत्वा इत्यस्यां क्रियायां पारिजातपल्लवादीनामपादानत्वम्, उद्गता—इत्यस्यां च क्रियायां क्षीरसागरादित्यस्यापादानत्वं बोध्यम्।

लक्ष्म्या एतद्विभूषितस्य नृपस्य च निन्दां प्रस्तौति—**न ह्येत्यादिना**। इह = अस्मिन्, जगति = संसारे, एवंविधम् = एतादृशम्, अपरिचितम् = परिचयजन्यस्नेहादिनिरपेक्षम्, किञ्चित् = किमपि, नहि= नैव, अस्ति=वर्तते, यथा=येन प्रकारेण, इयम्=एषा, अनार्या=नीचा, अश्रेष्ठा, लक्ष्मीः वर्तत इति शेषः।

अमुमेवार्थं द्रढयति—**लब्धेत्यादिना**। लब्धा = प्राप्ता, अपि, इयं लक्ष्मीः, दुःखेन = क्लेशेन, परिपाल्यते=परिपालनविषयीक्रियते,संरक्ष्यते। अन्यस्तु सामान्यप्रयासेन परिपालयितुं शक्यत इति भावः।

दृढेति। दृढेत्यादिः—दृढाः (= गाढाः) ये गुणाः (= शौर्यादयः, सन्धिविग्रहादयश्च) ते एव सन्दानम् (= बन्धनम्) तेन निष्पन्दीकृता (= निश्चलीकृता) अपि, लक्ष्मीः, नश्यति = अभावं गच्छति, अन्यत्र प्रयातीति भावः।

उद्दामेति। उद्दामेत्यादिः—उद्दामा (= उत्कटः) दर्पः (= अभिमानः) येषां तादृशा ये

२-प्रतिकूलता), उच्चैःश्रवा (नामक अश्व) से चञ्चलता (= १-अस्थिरता, २-चपलता), कालकूट (नामक विष) से मोहन शक्ति (१-वश में करने की शक्ति, २-मूर्च्छित करने की शक्ति), मदिरा से मद (१-अहंकार, २-मादकता, नशा), कौस्तुभ मणिसे निष्ठुरता (= १-निर्दयता, २-कठोरता) —इन विरहविनोद (विरहजन्य कष्टों को दूर करने) के चिह्नों को मानों लेकर ऊपर निकली है।

इस संसार में इस प्रकार का अपरिचित कोई भी पदार्थ ऐसा नहीं है जैसे की यह दुष्ट लक्ष्मी है। यह प्राप्त हुई भी बहुत दुःख से पाली जाती है,सुरक्षित रखी जाती है। और दृढ़ गुणों (१-शूरता आदि गुणों, २-रस्सियों) के बन्धन से निश्चल की जाती हुई भी नष्ट हो जाती है। उत्कट घमण्डवाले हजारों वीर योद्धाओं द्वारा चमकायीं गईं (ऊपर उठाई गई)तलवार रूपी लताओं(अर्थात् लम्बी-लम्बी तलवारों)

१. प्रतिनैष्ठुर्यम्। २. गृहीत्वैवोद्गता। ३. एवंविधमपरम्। ४. 'किञ्चित्'—इति नापि दृश्यते। ५. अनार्या दुःखेन लभ्यते। ६. दृढगुणपाश०। ७. उल्लसितासि०।

सिलता-पञ्जर-विधृताप्यपक्रामति । मदजल-दुर्द्दिनान्धकारगजघटित-घन-घटा-परिपालिता[1]पि प्रपलायते, न परिचयं रक्षति, नाभिजनमीक्षते, न रूपमालोकयते,[2] न कुलक्रममनुवर्त्तते, न शीलं पश्यति, न वैदग्ध्यं गणयति, न श्रुतमाकर्णयति, न धर्म्ममनुरुध्यते, न त्यागमाद्रि-

भटाः (=शूराः) तेषां सहस्रम् (=दशशती, प्रचुरसंख्या) तेन उल्लासिताः (=उत्थापिताः) या असिलताः (=खड्गव्रततयः) ता एव पञ्जरम् (=पिञ्जरम्, पक्ष्यादिबन्धनसाधनीभूतं लौहमयं वस्तु) तस्मिन् विधृता (=स्थापिता, बन्दीकृता), अपि,अपक्रामति=अपसरति, शत्रुनृपं प्रति यातीति भावः। अत्र रूपकम् ।

मदजलेति । मदजलेत्यादिः—मदजलम् (= दानसलिलम्) तदेव अन्धकारः (= तमः, श्यामत्वादिरिति भावः) तेन युक्ताः ये गजाः (= हस्तिनः) तैः घटिता (= निर्मिता) या घना (=निबिडा) घटा (=समूहः) तया परिपालिता (=संरक्षिता), अपि, यद्वा—मदजलैः अन्धकारो येभ्यः तादृशाः ये गजा एव घनाः (=मेघाः) तेषां घटया (=समूहेन) परिपालितापि, प्रपलायते= प्रकर्षेण पलायनं करोति । 'प्र' 'परा' पूर्वकात् 'अय' धातोः रेफस्य लत्वम् "उपसर्गस्यायतौ" इति सूत्रेणेति बोध्यम् । अत्र परम्परितरूपकम् । विभावनाविशेषोक्तिसन्देहानां साङ्कर्यात् सङ्करालङ्कारः।

नेति । इयं लक्ष्मीः परिचयम्=संस्तवम्, न=नैव, रक्षति=स्थापयति परिचितमपि झटिति परित्यजति, कुक्कुरोपि नैतादृशमाचरति । अभिजनम्=सत्कुलम् न=नैव, ईक्षते = विलोकयति, नीचकुलोत्पन्नं प्रति सत्वरं प्रयाति, भृत्योऽपि नेत्थमाचरति । रूपम्=सौन्दर्यम् न=नैव, आलोकयते= पश्यति, सुरूपमपि पुरुषं विहाय कुरूपमुपयाति, वेश्यापि नेदं करोति । कुलक्रमम् =वंशपरम्पराम्, न= नैव, अनुवर्त्तते=अनुसरति । गजादिरपि नैतादृशं करोति ।

शीलम् = सत्स्वभावम्, न = नैव, पश्यति = विलोकयति, दुष्टं प्रत्यपि भृशं गच्छति। वैदग्ध्यम् = विदग्धताम्, वैदुष्यम्, न = नैव, गणयति = विचारयति, मूर्खं जनमपि आश्रयति । श्रुतम्=शास्त्रश्रवणम्, न=नैव, आकर्णयति=शृणोति शास्त्रज्ञं सन्त्यज्य मूर्खं सेवते इति भावः । धर्मम् = सुकृतम्, न=नैव, अनुरुध्यते=अनुसरति, धर्मानुरोधेन धार्मिकं न समाश्रयतीति भावः। प्रायशः पापिन एव समालिङ्गति । त्यागम्=दानम्, न=नैव, आद्रियते=सत्करोति, दाननिरतजनस्य नादरं करोति । विशेषज्ञताम्=विशेषाभिज्ञताम्, न=नैव, विचारयति=विमृशति । धूर्तोपि नैतादृशं करोतीति भावः । आचारम्=सदाचारम्, न = नैव,विचारयति=चिन्तयति, चाण्डालादिसमीपे प्रयाति।

के पिंजड़े में स्थापित की गई भी (उससे बचकर) निकलकर भाग जाती है । मदजलरूपी दुर्दिन (वर्षा) से अन्धकारयुक्त हाथियों द्वारा बनाई गई मेघघटाओं (अथवा मेघसमूहों) से सुरक्षित की गई भी [बाहर] भाग जाती है। [यह लक्ष्मी] न तो परिचय (जान पहिचान) की रक्षा करती है, न उच्च कुल को देखती है, न रूप को देखती है, न वंशपरम्परा का अनुसरण करती है। न शील (सत्स्वभाव या सच्चरित्र) को देखती है, न वैदुष्य को गिनती है, न सुनी हुई बात को अर्थात् शास्त्रज्ञान को सुनती है, न धर्म का अनुरोध करती है, न दान का आदर करती है, न विशेषज्ञता का विचार करती है, न आचार (परम्परागत व्यवहार) का पालन करती है, न सत्य को जानती है, और न [शरीर आदि के शुभ] लक्षणों को प्रमाण मानती है । [जिनके शरीर में तिल मस्सा आदि शुभ

१. गजघन० । २. आलोकयति ।

यते, न विशेषज्ञतां विचारयति, नाचारं पालयति, न, सत्यमनुबुध्यते[1], न लक्षणं प्रमाणीकरोति। गन्धर्वनगर[2]लेखेव पश्यत एव नश्यति। अद्याप्यारूढ-मन्दर-परिवर्त्तावर्त्त-भ्रान्ति-जनित-संस्कारेव परिभ्रमति[3]। कमलिनी-सञ्चरण[4]व्यतिकर-लग्न-नलिन-नाल-कण्टकेव[5] न क्वचिदपि[6] निर्भरमाबध्नाति पदम्। अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविध-गन्धगज-गण्ड-मधुपान-

सत्यम् = अवितथम्, न = नैव, अनुबुध्यते = अवगच्छति, वञ्चकानामेव आश्रयणं करोति। लक्षणम् = तिलमषीकादिचिह्नविशेषम्, न = नैव, प्रमाणीकरोति = प्रमाणयति, सुलक्षणानपि परित्यज्य दुर्लक्षणानाश्रयति। पूर्वोक्तानि सर्वाण्यपि निन्दितानि कर्माणि विदधति।

गन्धर्वेति। गन्धर्वलेखा=गन्धर्वनगरम्, इव, इयं लक्ष्मीः, पश्यतः=विलोकयतः, एव, नश्यति= अदृष्टा भवति। गन्धर्वनगरं तु वृहत्संहितायामेवं वर्णितम्—"गन्धर्वनगरमुत्थितमापाण्डुरशनिपातवातकरम्। दीप्ते नरेन्द्रमृत्युर्वामेऽरिभयं जयः सव्ये॥

अद्यापीति। अद्यापि = अधुनापि, आरूढेत्यादिः—आरूढः (=उत्पन्नः, प्राप्तो वा) यः मन्दरस्य (= मन्दराख्यपर्वतस्य) परिवर्तेन (= पर्वतभ्रमणेन) आवर्त्तः (= जलस्य भ्रमिः) तस्मिन् या भ्रान्तिः (=भ्रमणम्, लक्ष्म्या इति भावः) तया जनितः (=उत्पादितः) यः संस्कारः (= वेगाख्यो गुणविशेषः) सः अस्ति अस्याः सा तादृशी, इव, परिभ्रमति = स्थानात् स्थानात् भ्रमणं करोति। कुत्रापि नैव दीर्घकालं स्थिरीभूय विराजत इति भावः।

कमलिनीति। कमलिनीत्यादिः—कमलिनी (=पद्मिनी) तासु स्वनिवासस्थानभूतासु, यत् सञ्चरणम् (=सञ्चारः) तदेव व्यतिकरः (=सम्बन्धः) तेन हेतुना लग्नाः (= संसक्ताः) ये नलिन-नालानाम् (= कमलनालानाम्) कण्टकाः (= नालाग्रभागाः) यस्याः सा तादृशी, इव सती, क्वचिदपि = कस्मिंश्चिदपि स्थाने, निर्भरम् = निश्चलम्, पदम् = चरणम्, न = नैव, आबध्नाति = विदधाति। कण्टकलग्नो जनो यथा एकस्मिन् स्थाने एकं पदं चिरं स्थापयितुं न शक्नोति तथैवेयं लक्ष्मीरपीति भावः। उत्प्रेक्षा

अतिप्रयत्नेति। परमेश्वरगृहेषु = महाराजसदनेषु, अतिप्रयत्नविधृता—अतिप्रयत्नेन (=अतिशयप्रयासेन) विधृता (=संस्थापिता) अपि, विविधेत्यादिः—विविधाः (= विभिन्नाः) ये गन्धगजाः (=गन्धहस्तिनः) तेषां गण्डेषु (=कपोलेषु) यानि मधूनि (=दानसलिलानि) तेषां पानेन (=सेवनेन) मत्ता (=उन्मत्ता, क्षीबा) इव, परिस्खलति = परिभ्रश्यति। अत्राप्युत्प्रेक्षैव।

चिह्न हैं उनके पास भी नहीं जाती है या जाकर छोड़ देती है।] गन्धर्वनगर की रेखा (पंक्ति) के समान देखते-देखते ही गायब (अदृष्ट, लुप्त) हो जाती है। (यह लक्ष्मी) आज भी मन्दराचल के घूमने के कारण होनेवाली भँवरों के चक्कर से उत्पन्न संस्कार से युक्त होकर [चारों ओर] चक्कर काटती फिरती है। कमलिनी पर विचरण के कारण उस कमलिनी के नाल (डंडे) के काँटे चुभी हुई के समान कहीं भी एक स्थान पर निश्चिन्त होकर पैर नहीं रखती है। अथवा ऐसे घूमती रहती है मानों पैर में काँटा चुभ गया हो। राजाओं के महलों में बहुत प्रयास करके पकड़ कर रखी गई भी (यह लक्ष्मी) मानों अनेक गन्धगजों के गण्डस्थलों के मधु के पीने से मत्त हुई सी लड़खड़ा कर गिर

१. अवबुध्यते। २. क्वचित् 'नगर' इति नास्ति। ३. भ्रमति।
४. सञ्चार०। ५. कण्टकक्षतेव। ६. इवं नापि दृश्यते।

मत्तेव परिस्खलति। पारुष्यमिवोपशिक्षितुमसिधारासु निवसति। विश्वरूपत्वमिव ग्रहीतुमा-[1]श्रिता नारायणमूर्त्तिम्। अप्रत्ययबहुला च दिवसान्त-कमलमिव समुपचित-[2]मूल-दण्ड-कोश-मण्डलमपि मुञ्चति भूभुजम्। लतेव विटपकानध्यारोहति। गङ्गेव वसुजनन्यपि तरङ्गबुद्बुद-

भवतु अतिशयसमृद्धिमतां गृहेषु गजादीनां स्थित्या मधुपानेन परिस्खलनं नाम, परन्तु सतां सामान्यानां गृहे तदभावात् कथं तत्रापि परिस्खलनमित्यत आह—पारुष्यमिति। पारुष्यम्=कठोरतामिव, उपशिक्षितुम्=अभ्यसितुम्, इव, असिधारासु=खड्गधारासु, निवसति=निवासं करोति।

विश्वरूपत्वमिति। विश्वरूपत्वम्—विश्वम् (=ब्रह्माण्डम्) तस्य रूपाणि यस्मिन् तत् तस्य भावस्तत्त्वम्। यद्वा—ब्रह्माण्डरूपत्वम्, गृहीतुम्=स्वीकर्तुम्, इव, नारायणमूर्तिम्=विष्णुशरीरम्, आश्रिता=अधिगता। विष्णुः विश्वरूपो वर्ततेऽतस्तादृशं रूपमाप्तुमियं तेन संगता। व्यापारिणां गेहेषु अन्यत्र च लक्ष्म्याः विविधानि रूपाणि दृश्यन्ते। भानुचन्द्रस्तु—"अथवा विश्वेन रूप्यते=निरूप्यते यद्रूपं तद्विश्वरूपम्, तस्य भावस्तत्त्वम्।" अत्रोत्प्रेक्षा।

अप्रत्ययेति। अप्रत्ययबहुला—अप्रत्ययः (=अविश्वासः) बहुलः (=प्रचुरः) यस्यां सा तादृशी, समुपचितेत्यादिः—समुपचितानि (=वृद्धिं गतानि) मूलम् (=कन्दः) दण्डः (=नालम्) कोशः (=कमलाभ्यतरदेशः) मण्डलम् (=पारिमण्डल्यम्) यस्य तत् तादृशम्, दिवसान्तकमलम्=दिनावसानपङ्कजम्, इव, समुपचितेत्यादिः—समुपचितानि (=सम्यग् रूपेण वृद्धिं प्रापितानि) मूलम् (=विजयस्य मूलं कारणं सैन्यादिबलम्) दण्डः (=चतुर्षूपायेष्वन्यतमः) कोषः (=धनादिसङ्ग्रहः) मण्डलम् (=देशः, राष्ट्रम्) यस्य स तं तादृशम्, अपि, भूभुजम्=भूपतिम्, मुञ्चति=परित्यजति। एतादृशबलवतापि रोद्धुं न शक्येति भावः। अत्र श्लेष उपमा चानयोः सङ्करः।

लतेवेति। लता=व्रतती, इव, विटपकान्=वृक्षान्, पक्षे—निन्दितकामुकान् अध्यारोहति=आश्रयति। 'विटपः पल्लवे षिङ्गे विस्तारे स्तम्बशाखयोः।" इति विश्वकोशात् पूर्वोक्तार्थौ। स्वार्थे कप्रत्ययः। विटान् पाति=रक्षतीति विटपः। विटलक्षणञ्चेत्थम्—"संभोगहीनसम्पद्विटस्तु धूर्तः कलैकदेशज्ञः। वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्।" उपमाश्लेषौ।

गङ्गेवेति। गङ्गा=जाह्नवी, इव, वसुजननी=वसोः (=भीष्मस्य) जननी (=प्रसूः) अपि, तरङ्गबुद्बुदचञ्चला=तरङ्गबुद्बुदौ (=भङ्ग-स्थासकौ) ताभ्यां चञ्चला (=चपला)। पक्षे-वसूनाम् (=धनानाम्) जननी (=उत्पादयित्री) अपि तरङ्गबुद्बुद्वत् चञ्चला=अस्थिरा।

जाती है (समाप्त हो जाती है या चली जाती है)। यह मानों पारुष्य (=कठोरता, निर्दयता) सीखने के लिए तलवारों की धारों में रहती है। विष्णु के शरीर को मानों विश्वरूपत्व (=समस्त ब्रह्माण्ड का विराट् रूप अथवा सभी प्रकार के रूप) का ग्रहण करने के लिए आश्रित किये हुए है। और अतिशय अविश्वास से युक्त अर्थात् किसी पर भी विश्वास न करनेवाली यह दिवस के अन्त में अर्थात् सायंकाल में परिपुष्ट मूल (=जड़), दण्ड (=नाल), कोश (=भीतरी भाग) और मण्डल (=गोलस्वरूप) वाले कमल के समान ही मूल (=मूल देश, पैतृक राज्य), दण्ड (=दमन), कोश (=खजाना) और मण्डल (=कर देनेवाले राजाओं) वाले महान् राजा का भी परित्याग कर देती है। (अर्थात् सायं समय में कमल जैसे शोभाहीन हो जाता है उसी प्रकार राजा भी लक्ष्मीहीन हो जाता है।) लता जैसे विटपों (वृक्षों) पर आरूढ होती है वैसे ही यह भी विटपों (विटों=धूर्तों को संरक्षण देनेवाले अर्थात् महादुष्टों) पर आरूढ होती है, उनके साथ रहती है। वसु (भीष्म) की

१. दिवसान०। २. समुचि···।

चञ्चला। दिवसकरगतिरिव प्रकटित-विविध-संक्रान्तिः। पातालगुहेव तमोबहुला। हिडिम्बेव[1] भीमसाहसैकहार्य्यहृदया। प्रावृडिवाचिरद्युतिकारिणी। दुष्टपिशाचीव दर्शितानेकपुरुषोच्छ्राया स्वल्पसत्त्वमुन्मत्तीकरोति। सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति। जनं गणवन्तमपवित्रमिव

दिवसेति। दिवसकरगतिः = सूर्यसञ्चरणम्, इव, प्रकटित-विविध-सङ्क्रान्तिः—प्रकटिता (= प्रकाशिता) विविधेषु (= नानाप्रकारेषु, रूपेषु स्थानेषु वा) सङ्क्रान्तिः (= सञ्चारः) यया सा तादृशी। पक्षे—प्रकटिता विविधाः (= अनेकाः द्वादशधा) सङ्क्रान्तयः (= राश्यन्तर-सङ्क्रमणानि) यया सा तादृशीः। सूर्यो द्वादशराशिषु सङ्क्रामतीति प्रसिद्धम्। उपमा।

पातालेति। पातालगुहा=रसातलकन्दरा इव, तमोबहुला = तमःप्रचुरा। पक्षे—तमोगुणप्रधानेति भावः। अस्यामपि तमोगुणस्यैवोत्कृष्टत्वं दृश्यते। उपमा।

हिडिम्बेति। हिडिम्बा=घटोत्कचमाता, इव, भीमसाहसैकहार्यहृदया—भीमस्य (= भीमसेनस्य) साहसैकेन (=साहसगुणमात्रेण, हिडिम्बमारणादिरूपेणेति भावः) हार्यम् (=हरणीयम्, वशीकरणीयम्) हृदयम् (= चित्तम्) यस्याः सा। अत्र पक्षे—भीमसाहसैकेन (= शत्रुराज्याक्रमणप्रभृति-केवल-भीषणहठवादितया), हार्यम् (= हर्तुं शक्यम्) हृदयम् (= चित्तम्) यस्याः सा तादृशी। हिडिम्बा राक्षसी भीमस्य केवलं सादृशं विलोक्यैवाकृष्टा भूत्वा तत्पत्नी बभूवेति महाभारतादौ सुप्रसिद्धम्।

प्रावृडिति। प्रावृट्=वर्षासमयः, इव, अचिरद्युतिकारिणी—अचिरम् (= अल्पकालम्) द्युतिम् (= शोभाम्) करोति (= सम्पादयति) तादृशी। पक्षे—अचिरद्युतिम् = तडितं कर्तुं शीलं यस्याः सा तादृशी। यथा विद्युदाकाशे किञ्चित्क्षणमेव प्रकाश्य लुप्ता भवति तथैव लक्ष्मीरपि प्रभावं प्रदर्श्य लुप्ता जायते इति भावः।

दुष्टेति। दुष्टपिशाची—दुष्टा (= क्रूरा) पिशाची (= राक्षसी), इव, दर्शितेत्यादिः—दर्शितः (= प्रकटितः) अनेकपुरुषाणाम् (= नानामनुष्याणाम्) उच्छ्रायः (= औन्नत्यम्) यया सा तादृशी सती, स्वल्पसत्त्वम् = अल्पसाहसम्, भीरुमित्यर्थः, उन्मत्तीकरोति = उन्मत्ततां प्रापयति। पक्षे—दर्शितः अनेकपुरुषाणाम् उच्छ्रायः (= अभ्युन्नतिः) यया सा तादृशी। अत्रोपमा।

सरस्वतीति। इयं लक्ष्मीः, सरस्वतीपरिगृहीतम् = शारदानुगृहीतम्, विद्वांसं पुरुषमित्यर्थः, ईर्ष्यया = मात्सर्येण, इव, न = नैव, आलिङ्गति = आश्रयति। यथा सपत्नी स्वस्वामिनं सपत्न्यन्तरसम्बद्धं ज्ञात्वा नालिङ्गति तथैवेयं लक्ष्मीरपि बुधं सरस्वतीसम्बद्धं नालिङ्गति। 'जनमि'तीदमिहैवान्वितं केचित्स्वी-

जननी गङ्गा जैसे तरंगों और बुलबुलों से चंचल है वैसे ही यह लक्ष्मी भी वसु (धन) की जननी होती हुई भी तरङ्ग और बुलबुलों के समान चंचल=अस्थायी है। सूर्य की गति जैसे मेष और वृष आदि विविध १२ संक्रान्तिओं को प्रकट करती है वैसे ही यह भी अनेक व्यक्तियों में संक्रमण किया करती है। पाताल की गुफा जैसे बहुत अधिक अंधेरे से युक्त है वैसे ही यह भी तमोगुण की अधिकता वाली है। हिडिम्बा (घटोत्कच की माता) जैसे भीमसेन के केवल साहस से वशीभूत हृदयवाली हो गई थी वैसे ही यह भी भयानक साहसपूर्ण कार्यों से ही वश में की जाने योग्य है। वर्षा जैसे बिजली को उत्पन्न करनेवाली है वैसे ही यह थोड़े ही समय द्युति (चमकदमक) करने वाली है। दुष्ट पिशाचिनी जैसे [एक के ऊपर एक खड़े हुए] अनेक पुरुषों की ऊँचाई दिखा देने वाली होती है और स्वल्पसत्त्व वाले अर्थात् भीरु (डरपोक) को भी उन्मत्त बना देती है वैसे ही यह भी अनेक व्यक्तियों की उन्नति (वृद्धि) दिखा देने वाली होती है और साधारण व्यक्ति को भी उन्मत्त बना देती है। सरस्वती द्वारा गृहीत अर्थात् विद्वान् पुरुष का आलिङ्गन मानों [सौत की] ईर्ष्या के कारण नहीं करती है।

१. हिडम्बेव।

न स्पृशति, उदारसत्त्वममङ्गलमिव न बहु मन्यते, सुजनमनिमित्तमिव न[1] पश्यति, अभिजात-महिमिव लङ्घयति, शूरं कण्टकमिव परिहरति, दातारं दुःस्वप्नमिव[2] न स्मरति, विनीतं पातकिनमिव नोपसर्पति[3], मनस्विनमुन्मत्तमिवोपहसति[4]।

परस्परविरुद्धञ्चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम्। तथाहि—

कुर्वन्ति। अपरे आगामिनि वाक्येऽन्वितं वदन्ति।

जनमिति। गुणवन्तम्=गुणिनम्, जनम्=लोकम्, अपवित्रम्=मलिनं दोषादिग्रस्तम्, इव, न=नैव, स्पृशति=स्पर्शं करोति, मलादिसम्पर्कभीत्येति भावः।

उदारेति। उदारसत्त्वम्=उदारस्वभावम् महाशयम्, अमङ्गलम्=अकल्याणम्, इव, बहु=अधिकम्, न=नैव, मन्यते=आद्रियते। अतिदानादिना स्वहानिभीत्येति भावः।

सुजनमिति सुजनम्=सज्जनम्, अनिमित्तम्=अपशकुनम्, इव, न=नैव, पश्यति=विलोकयति। यथा अपशकुनं प्रति सावधानतया दृष्टिर्न दीयते तथैवेयं लक्ष्मीः सुजनं सावधानतया न विलोकयति।

अभिजातमिति। अभिजातम्=सत्कुलोत्पन्नम्, अहिम्=सर्पम्, इव, लङ्घयति=उल्लङ्घ्य गच्छति। यथादंशभीत्या सर्पमुल्लङ्घ्याग्रे व्रजन्ति लोकास्तथैव स्वविनाशभिया लक्ष्मीरभिजातमुल्लङ्घ्यान्यत्र पलायते।

शूरमिति। शूरम्=शौर्यवन्तम्, कण्टकम्=द्रुमाङ्गम्, शरीरवेधनादिकारणीभूतम्, इव, परिहरति=दूरतस्त्यजति। शूरः स्वाभिमानरक्षणाय लक्ष्मीमपि त्यजन्तीति एषा तान्नोपगच्छति।

दातारमिति। दातारम्=दानशीलम्, दुःस्वप्नम्=अशुभस्वप्नम्, इव, न=नैव, स्मरति=स्मृतिविषयीकरोति। दानिना स्वपरित्यागं विचिन्त्य तेषां स्मरणमप्यनुचितं जानाति।

विनीतमिति। विनीतम्=विनम्रम्, पातकिनम्=पापकारिणं लोकम्, इव, न=नैव, उपसर्पति=उपयाति।विनयी लक्ष्मीरक्षां कर्तुं न प्रभवतीति न तानुपसर्पति।

मनस्विनमिति। मनस्विनम्=प्रशस्तचित्तम्, स्वाभिमाननम्, उन्मत्तम्=उन्मादयुक्तम्, इव, उपहसति=उपहासविषयीकरोति। मनस्विभिरेतस्याः परित्यागसम्भवात्। उपमा।

परस्परेति। च शब्दः किञ्चेत्यर्थे। इन्द्रजालम् = कुहकम्, दर्शयन्ती = प्रकाशयन्ती, इव, जगति=संसारे, परस्परविरुद्धम्=मिथोऽसम्बद्धधर्मयुक्तम्,निजम्=स्वीयम्, चरितम्=वृत्तम्, प्रकटयति=आविष्करोति। अत्रोत्प्रेक्षा।

पूर्वोक्तं परस्परविरुद्धधर्मवत्त्वं प्रदर्शयति—**तथाहीत्यादिना**। पूर्वोक्तश्च एवं रीत्या बोध्यम्। सततम्=निरन्तरम्, ऊष्माणम्=तापम्, जनयन्ती=उत्पादयन्ती, अपि, जाड्यम्=शैत्यम्, उपजनयति=

गुणवान् व्यक्ति का स्पर्श [इसलिए] नहीं करती है मानों कि वह अपवित्र हो। उदार स्वभाववाले को [इसलिए] अधिक नहीं मानती है कि मानो वह अमंगल हो। सुजन (भले पुरुष) को [इसलिए] नहीं देखती है कि मानों वह अनिमित्त (शुभ लक्षणहीन) हो। उच्चकुल में उत्पन्न व्यक्ति को [इसलिए] लांघ जाती है, छोड़कर आगे बढ़ जाती है कि मानो वह सांप हो। शूर को [इसलिये] छोड़ देती है कि मानों वह दुःस्वप्न हो। विनयी के पास [इसलिए] नहीं जाती है कि वह मानों पातकी हो। मनस्वी का उपहास [इसलिए] करती है कि मानों वह उन्मत्त हो। परस्पर-विरोधी बातों वाले इन्द्रजाल के समान अपने चरित्र को दिखाती हुई सी प्रकट करती है अर्थात् इन्द्रजाल में जैसे परस्पर

---

१. क्वचित् 'न' इति नैव दृश्यते। २. दुःखस्वप्नम्। ३. नापसर्पति ४. हसति। ५. इदं क्वचिन्नापि पठ्यते।

सततम्[1] ऊष्माणमुपजनयन्त्यपि[2] जाड्यमुपजनयति। उन्नतिमादधानापि नीचस्वभावतामाविष्करोति। तोयराशिसम्भवापि[3] तृष्णां संवर्द्धयति। ईश्वरतां दधानाप्यशिवप्रकृतित्वमातनोति। बलोपचयमाहरन्त्यपि लघिमानमापादयति। अमृतसहोदरापि कटुक[4]विपाका।

उत्पादयति, करोतीत्यर्थः। अत्र विरोधः, ऊष्माणम्=धनगर्वम्,जाड्यम्=जडताम्,सदसद्विवेकराहित्यम्—इत्यर्थेन विरोधपरिहारः।

उन्नतिमिति। उन्नतिम्=ऊर्ध्वंगतिम्, आदधाना=कुर्वाणा, अपि, नीचस्वभावताम्=निकृष्टवृत्तित्वम्, उपजनयति=सम्पादयति। अत्र विरोधः, परिहारस्तु—उन्नतिम्=उत्कर्षम्, नीचस्वभावताम्=निकृष्टप्रकृतित्वम्—इत्यर्थेन।

तोयराशीति। तोयराशीत्यादिः—तोयराशिः (=जलनिधिः) तस्मात् सम्भवः (=समुत्पत्तिः) यस्याः सा तादृशी, अपि, तृष्णाम्=पिपासाम्, सर्वंद्धयति=समेधयति। अत्र विरोधः। परिहारस्तु—तृष्णाम्=धनादिलिप्साम्—इत्यर्थेन। "तृष्णे स्पृहापिपासे द्वे।" इत्यमरः।

ईश्वरतामिति। ईश्वरताम्=शिवत्वम्, दधाना=धारयन्ती, अपि, अशिवप्रकृतित्वम्=अशिवस्वभावत्वम्, आविष्करोति=प्रकटयति। अत्र विरोधः। परिहारस्तु—ईश्वरताम्=प्रभुताम्, दधानापि, अशिवप्रकृतित्वम्=अमङ्गलस्वभावत्वम् आविष्करोति—इत्यर्थेन।

बलोपचयमिति। बलोपचयम्=शारीरिकबलवृद्धिम्, आहरन्ती=आनयन्ती, कुर्वती, अपि, लघिमानम्=लघुत्वं दौर्बल्यमित्यर्थः, आपादयति=सम्पादयति। अत्रार्थे विरोधः। परिहारस्तु—बलोपचयम्—बलस्य (=सैन्यस्य) उपचयम् वृद्धिम्, लघिमानम्=कृपणताम्, आपादयति—इत्यर्थेन।

अमृतेति। अमृतसहोदरा—अमृतस्य (=सुधायाः) सहोदरा (=सोदर्या), अपि, कटुकविपाका—कटुकः (=कटुः, अप्रियः) विपाकः (=रसः) यस्याः सा तादृशी। अत्रार्थे विरोधः। परिहारस्तु—कटुकः=सन्तापजनकत्वेन क्लेशकरः विपाकः=परिणामः यस्याः सा तादृशी—इत्यर्थेन।

विरोधी कार्य दिखाये जाते हैं वैसे ही लक्ष्मी अपना परस्पर-विरोधी रूप प्रकट करती है। वह इस प्रकार से है—निरन्तर ऊष्मा (गर्मी) को उत्पन्न करती हुई भी जड़ता (शीतलता) को उत्पन्न करती है। [इस विरोध का परिहार ऊष्मा=दर्प, जड़ता=मन्दबुद्धिता उत्पन्न करती है—अर्थ मानकर होता है।] उन्नति=ऊँचाई प्रदान करती हुई भी नीचे होना प्रकट करती है। [विरोध-परिहार—उन्नति=अभ्युदय, नीचस्वभावता=निकृष्ट स्वभाव होना प्रकट करती है—इस अर्थ से है।] तोयराशि=जलसमूह से उत्पन्न होने वाली भी यह तृष्णा=प्यास को बढ़ाती है। [विरोध-परिहार—तोयराशि=समुद्र से उत्पन्न होने वाली! तृष्णा=धनादि की उत्तरोत्तर लिप्सा बढ़ाती है—इस अर्थ से है।] ईश्वरता=शिवरूपता को धारण करती हुई भी अशिव-स्वभाव वाला होने का विस्तार करती है। [विरोधपरिहार—ईश्वरता=धनी होना। अशिवप्रकृतित्व=अमंगल स्वभाववाला होने का विस्तार करती है—इस अर्थ से होता है।] बल की वृद्धि करती हुई भी हल्कापन ला देती है। [विरोधपरिहार—बल=सैन्य की वृद्धि करती हुई भी लघिमा=तुच्छता ला देती है—इस अर्थ से है।] अमृत की सहोदरा (सगी बहन) होती हुई भी कड़वे विपाक=फलवाली है। [विरोधपरिहार—कटु अनिष्ट परिणामवाली है—इस अर्थ से है।] यह=विग्रह शरीर वाली होती हुई भी प्रत्यक्ष दिखाई

१. सन्ततम्। २. आरोपयन्त्यपि। ३. ०राशिरिव। ४. कटु०।

विग्रहवत्यप्यप्रत्यक्षदर्शना। पुरुषोत्तमरतापि खलजनप्रिया। रेणुमयीव स्वच्छमपि कलुषीकरोति।

यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म्म केवलमुद्वमति। तथाहि—इयं संवर्द्धनवारिधारा तृष्णाविषवल्लीनाम्, व्याधगीतिरिन्द्रिय-

---

विग्रहेति। विग्रहवती = शरीरधारिणी, अपि, मूर्तिमती अपि, अप्रत्यक्षदर्शना—अप्रत्यक्षम् (=चक्षुषोऽविषयः) दर्शनम् (=अवलोकनम्) यस्याः सा तादृशी। अत्रार्थे विरोधः। परिहारस्तु—विग्रहवती =कलहवती, स्वप्राप्तये प्रियेष्वपि कलहजननीति भावः। "विग्रहः कायविस्तारविभागे ना रणे स्त्रियाम्।" इति मेदिनी।

पुरुषोत्तमेति। पुरुषोत्तमरता—पुरुषोत्तमेषु (=उत्तमजनेषु) रता (=आसक्ता), अपि, खलजनप्रिया—खलजनानाम् (=दुष्टपुरुषाणाम्) प्रिया (=अभीष्टा) यद्वा खलाः जनाः प्रियाः यस्याः सा तादृशी। अत्रार्थे विरोधः। परिहारस्तु— पुरुषोत्तमे (=विष्णौ) रता (=अनुरक्ता)। पुरुषेषु उत्तम इति विग्रहे सप्तमीतत्पुरुषः, तेन 'न निर्धारणे' इति न निषेधः समासस्य।

अत्रेदं बोध्यम्—"ऊष्माणमारोपयन्त्यपि" इत्यारभ्य 'पुरुषोत्तमरता' इत्येतत् पर्यन्तमष्टवाक्येषु विरोधाभासाख्योऽलङ्कारः।

रेणुमयीति। रेणुमयी=धूलिमयी, इव, स्वच्छम्=निष्कलुषम्, अपि, जनं कलुषीकरोति=मलिनीकरोति। अत्रोत्प्रेक्षा।

यथेति। च शब्दः किञ्चेत्यर्थे। चपला =चञ्चला, इयम्=लक्ष्मीः यथा यथा =येन येन प्रकारेण, दीप्यते = दीप्ता भवति, प्रकाशते, तथा तथा = तेन तेन प्रकारेण, दीपशिखा = दीपज्वाला, इव, कज्जलमलिनम्—कज्जलम् (= अञ्जनम्), इव, मलिनम् (= मलीमसम्) एव, कर्म =परपीडनादिक्रियाम्, केवलम्, उद्वमति = उद्गिरति। दीपकज्वाला उज्ज्वला दृश्यमानापि मलीमसं कज्जलमेव परिणमयति तथैवेयमपि निन्दितकर्माणि एव कारयतीति भावः। अत्रोपमा।

केन रूपेण मलिनं कर्मोद्वमतीति प्रकटयति—**तथा हीत्यादिनेति।** इयम् = लक्ष्मीः तृष्णाविषवल्लीनाम्—तृष्णा (=लिप्सा) एव विषवल्ल्यः (=विषलताः) तासाम्, संवर्द्धनवारिधारा:—संवर्द्धने (= विस्तारणे) वारिधारा (= जलधारा)। यथा यथेयं प्राप्यते तथा तथैवाधिकमवाप्तुं, तृष्णां वर्धयति।

इन्द्रियेति। इयं लक्ष्मीः, इन्द्रिय-मृगाणाम्—इन्द्रियाणि (= हृषीकाणि) एव मृगाः

देनेवाली नहीं है। [विरोधपरिहार—विग्रह=युद्ध का कारण होती हुई भी प्रत्यक्ष नहीं दिखाई पड़ती है।] उत्तम पुरुषों में आसक्त होती हुई भी खलों=दुष्टों की प्रिया है। [विरोधपरिहार—पुरुषोत्तम = विष्णु में अनुरक्त होती हुई भी दुष्टों को चाहने वाली है।] यह मानो धूलि से युक्त अर्थात् बनी हुई होने से स्वच्छ व्यक्ति को भी कलुषित कर डालती है।

और यह चपला लक्ष्मी जैसे-जैसे दीप्त होती है वैसे-वैसे दीपशिखा के समान केवल काजल-सदृश मलिन कर्मों का उद्वमन=प्रकटन करती है। [अर्थात् जैसे-जैसे लक्ष्मी की वृद्धि होती है वैसे वैसे मनुष्य बुरे से बुरे कार्यों में प्रवृत्त होने लगता है।] यह इस प्रकार है—यह लक्ष्मी तृष्णारूपी विषलताओं को बढ़ानेवाली जलधारा है, [जैसे जैसे प्राप्त होती जाती है और अधिक पाने की लिप्सा बढ़ती जाती है।] इन्द्रियरूपी मृगों [को विवश करने] के लिए व्याधों का गीत है [व्याध के गीतों से

मृगाणाम्, परामर्शधूमलेखा सच्चरित-चित्राणाम्, विभ्रमशय्या मोहदीर्घनिद्राणाम्, निवास-जीर्णवलभी धनमद-पिशाचिकानाम्, तिमिरोद्गतिः शास्त्रदृष्टीनाम्, पुरःपताका[1] सर्वाविनयानाम्, उत्पत्तिनिम्नगा क्रोधावेगग्राहाणाम्, आपानभूमिर्[2] विषयमधूनाम्, सङ्गीतशाला भ्रूविकार-

(=हरिणाः) तेषाम्, व्याधगीतिः = मृगवधाजीवगानम् । यथा व्याधाः स्वमधुरगीतैर्मृगानाकृष्य तेषां प्राणान् हरन्ति तथैवेयमपि इन्द्रियाणि विषयाभिमुखानि विधाय लोकान्नाशयति ।

परामर्शेति । इयं लक्ष्मीः, सच्चरितचित्राणाम्—सच्चरितानि (=सुवृत्तानि) एव चित्राणि (=आलेख्यानि) तेषाम्, परामर्शधूमलेखा—परामर्शः (=आमर्शनम् प्रोञ्छनम्, आवरणम्) तदर्थं धूमलेखा (= अग्निकेतनरेखा) । यथा धूमलेखा शनैः शनैः चित्राणि आवृतानि कृत्वा विनाशयति तथैवेयमपि शनैः शनैः सच्चरितानि विनाशयति ।

विभ्रमेति । इयं लक्ष्मीः, मोहदीर्घनिद्राणाम्—मोहाः (=मौढ्यानि, कर्त्तव्याकर्त्तव्यविवेक-शून्यताः) एव दीर्घनिद्राः (=दीर्घस्वापाः) तासाम्, विभ्रमशय्या=विलासशयनम् । अस्याः संसर्गेण पुरुषाणां सदसद्विवेको विनश्यतीति भावः ।

निवासेति । इयं लक्ष्मीः, धनमदपिशाचिकानाम्—धनमदाः (= सम्पत्त्यहङ्काराः), एव, पिशाचिकाः (=राक्षस्यः) तासाम्, निवासजीर्णवलभी—निवासाय (=अवस्थानाय) जीर्णवलभी (=प्राचीना चन्द्रशाला, गृहोपरिभागो वा) । यथा जीर्णगृहेषूपरिभागे पिशाच्यादयो निवसन्ति तथैवास्यां लक्ष्म्यां धनमदानामवस्थानं वर्तते इति बोध्यम् ।

तिमिरेति । इयं लक्ष्मीः, शास्त्रदृष्टीनाम्=शास्त्राणि (=वेदादीनि) एव दृष्टयः (=नेत्राणि) तासाम्, तिमिरोद्गतिः—तिमिरस्य (=नेत्ररोगविशेषस्य) उद्गति=उत्पत्तिः, अनयैव तासां निरोधात् । इयं लक्ष्मीः, **सर्वाऽविनयानाम्**—सर्वेषाम् (=सकलानाम्) अविनयानाम् (=औद्धत्यानाम्) पुरःपताका=अग्रवैजयन्ती । यथा पताकामवलोक्य रथाद्यागमनमनुमीयते तथैव लक्ष्मीं दृष्ट्वा सकलदुश्चरित्राणामनुमानं भवतीति भावः । **क्रोधावेग-ग्राहाणाम्**—क्रोधस्य (=प्रकोपस्य) आवेगाः (=संभ्रमाः) एव ग्राहाः (=मकरादिजलजन्तवः) तेषाम् उत्पत्तिनिम्नगा—उत्पत्तौ (=उद्भवे, प्रजनने) निम्नगा (=नदी) । लक्ष्मीसत्तायामेव क्रोधोद्भूताः विकाराः जायन्ते इति भावः । **विषयमधूनाम्**—विषयाः

जैसे मृग विवश होकर उनके पास चले जाते हैं और मारे जाते हैं, वैसे ही लक्ष्मी के कुप्रभाव से इन्द्रिय-विषयासक्त पुरुष का विनाश होता है ।] सच्चरित-रूपी चित्रों का आवरण करने वाली धुंएँ की रेखा है । [धूयें से जैसे चित्र ढक जाते हैं, नहीं दिखाई देते हैं वैसे ही लक्ष्मी के कारण अच्छा चरित्र लुप्त हो जाता है ।] मोहरूपी दीर्घनिद्रा के लिए विलास-शय्या है । [विलास-शय्या से मनुष्य कभी नहीं उठ पाता है ।] धनमद रूपी पिशाचिनियों के रहने के लिए जीर्ण शीर्ण अटारी है । [जैसे जीर्ण मकान के ऊपरी भाग में पिशाचिनी आदि रहती है वैसे ही लक्ष्मी में मद आदि रहते हैं ।] शास्त्ररूपी नेत्रों के लिए तिमिर (मोतियाबिन्द जैसा कोई) रोग-विशेष है । [तिमिर से जैसे दर्शन-शक्ति छिप जाती है वैसे ही लक्ष्मी के कारण शास्त्र ज्ञानरूपी दृष्टि समाप्त हो जाती है, सदसद्विवेक लुप्त हो जाता है । सभी अविनयों (उद्दण्डताओं) की यह पुरःपताका (आगे चलने वाली पताका) है । [जैसे पताका देखकर उसके पीछे रथादि का अनुमान होता है उसी प्रकार लक्ष्मी देखकर समस्त

१. पुरःसरपताका ।   २. आवासभूमिः ।

नाटचानाम्, आवासदरी दोषाशीविषाणाम्, उत्सारणवेत्रलता सत्पुरुषव्यवहाराणाम्[1], अकालप्रावृड् गुणकलहंसकानाम्, विसर्पणभूमिर्लोकापवादविस्फोटकानाम्[2], प्रस्तावना कपटनाटकस्य, कदलिका कामकरिणः, वध्यशाला साधुभावस्य, राहुजिह्वा धर्मेन्दुमण्डलस्य। न हि तं पश्यामि, यो ह्यपरिचितयानया[3] न निर्भरमुपगूढः। यो वा न विप्रलब्धः।

(=स्रक्चन्दनस्त्रीसम्पर्कादयः) एव मधूनि (=मद्यानि) तेषाम् आपानभूमिः=पानगोष्ठीस्थानम्, लक्ष्मीसत्त्वे एव प्रचुरभोगसम्भवः। **भ्रूविकार-नाटचानाम्**—भ्रूविकाराः (=भृकुटिभङ्गाः) एव नाट्यानि (=नर्तनानि) तेषां सङ्गीतशाला=सङ्गीत-शिक्षण-स्थलम्, रङ्गशाला। तस्यां यथा भ्रूकुटि-सञ्चालनादि शिक्ष्यते तथैव लक्ष्मीसत्त्वे पुरुषेण इमे विकाराः शिक्ष्यन्ते। **दोषाशीविकाराणाम्**—दोषाः (=कामादिदूषणानि) एव आशीविषाः (=सर्पाः) तेषाम्, आवासदरी=निवासकन्दरा, अस्यां सत्यामेव कामादिविकाराणां प्राबल्येन सम्भवात्। **सत्पुरुष-व्यवहाराणाम्**—सत्पुरुषाः (=शिष्ट-लोकाः) तेषां ये व्यवहाराः (=परहितसाधनादि-सदाचाराः) तेषाम्, उत्सारणवेत्रलता—उत्सारणाय (=दूरीकरणाय) वेत्रलता (=वेतसयष्टिः)। यथा वेतसयष्टया जना दूरीक्रियन्ते तथैव अस्याः सत्तया सदाचारा दूरीक्रियन्ते। **गुणकलहंसकानाम्**—गुणाः (=दाक्षिण्यादयः) एव कलहंसाः (=कादम्बाः) तेषाम्, अकालप्रावृट्—अकाले (=असमये) प्रावृट् (=वर्षा)। अकालवर्षया यथा कादम्बाः पलाय्यन्ते तथैवानया गुणाः दूरीक्रियन्ते। **लोकापवादविस्फोटकानाम्**—लोकापवादाः(=जनापवादाः, जनाधिक्षेपाः) एव विस्फोटकाः (=पिटकाः) तेषाम्, विसर्पणभूमिः (=विस्तरणस्थानम्)। लक्ष्मीसत्तायां विविध-निन्दिताचरणजन्यलोकापवादाः जायन्ते। **कपटनाटकस्य**—कपटम् (=छलम्) एव नाटकम् (=अभिनयः) तस्य प्रस्तावना=आमुखम्, अस्याः सत्तायां कपटारम्भसम्भवः। **कामकरिणः**—कामः (=कामदेवः) एव करी (=हस्ती) तस्य कदलिका (=रम्भा)। यथा कदलीसमूहे करिणः स्वच्छन्दं भ्रमन्तः आनन्दमनु-भवन्ति तथैवास्याः सत्तायां स्वच्छन्दविहारदर्शनम्। **साधुभावस्य**=सज्जनतायाः, वध्यशाला=हनन-स्थानम्। अस्याः सत्तायां साधुत्वस्य सर्वथा विनाशो दृश्यते। **धर्मेन्दुमण्डलस्य**—धर्मः (=सुकृतानुष्ठानम्) एव इन्दुमण्डलम् (=चन्द्रमण्डलम्) तस्य राहुजिह्वा=सैंहिकेयरसना। अस्याः सत्तया सर्वविधधर्मा-चरणानां विनाशो लोपो वा भवति।

न हीति। हि=निश्चितम्, तम्=जनम्, न=नैव, पश्यामि=अवलोकयामि, यः=जनः, अपरिचितया=परस्परज्ञानरहितया, अनया=लक्ष्म्या, निर्भरम्=गाढं यथा स्यात् तथा, न=नैव,

अविनयों का अनुमान कर लिया जाता है।] क्रोध के आवेगरूपी ग्राहों (मगरों) की उत्पत्ति-स्थानरूपी नदी है। [नदी में जैसे मगर आदि भीषण जलजन्तु पैदा होते हैं वैसे ही लक्ष्मी आने पर क्रोध के आवेग आदि पैदा हो जाते हैं।] विषय [सुख] रूपी मदिराओं के लिए [मदिरा] पान का स्थान (शराब घर) है। भौंहों को टेढ़ा करना आदि विलास रूपी नाट्यों (अभिनयों) के लिए सङ्गीतशाला है। दोषरूपी अजगर सर्पों की निवासगुफा (रहने के लिए गुफा) है। सज्जनों के व्यवहार (या उपदेशों) को हटाने वाली वेत्रलता है, [जैसे छड़ी से मार कर किसी को भगा दिया जाता है वैसे ही लक्ष्मी द्वारा सज्जनों के व्यवहार = आचरण भगा दिये जाते हैं।] गुणरूपी कलहंसों [को भगाने वाली] अकाल वर्षा है। लोकनिन्दा रूपी फोड़ों के फैलाने की [उपयुक्त] स्थान है। कपटरूपी नाटक की प्रस्तावना (भूमिका) है। कामरूपी हाथी की [प्रिय भक्ष्य]

१. व्याहाराणाम्। २. ···विस्फोटानाम्। ३. क्वचित् 'अनया' इदं न दृश्यते।

नियतमियमालेख्यगतापि चलति, पुस्तमय्यपीन्द्रजालमाचरति[1], उत्कीर्णापि विप्रलभते, श्रुताप्यभिसन्धत्ते, चिन्तितापि वञ्चयति।

एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीता[2] विक्लवा भवन्ति[3] राजानः, सर्वाविनयाधिष्ठानताञ्च गच्छन्ति। तथा हि—अभिषेकसमय एव चैतेषां[4] मङ्गल-

उपगूढः=आलिङ्गितः। वा=अथवा यः=नरः, न=नैव, विप्रलब्धः=प्रतारितः। संसारे प्रायः सर्वानपि पुरुषान् कदाचिदियमवश्यमेव आलिङ्गति, स्वयमाश्लिष्यति। पश्चाच्च अकस्मात् तं विहायान्यमुपयतीति भावः। अत्र समासोक्तिः।

नियतमिति। नियतम्=निश्चितम्, इयम्=लक्ष्मीः, आलेख्यगता=चित्रस्थिता अपि, चलति=अन्यत्र प्रयाति। पुस्तमयी=मृत्काष्ठादि-रचितपुत्तलिकारूपा, अपि, इन्द्रजालम्=कुहकम्, आचरति=प्रदर्शयति। अकस्मात् लुप्यति। क्वचित्तु 'पुस्तकमयी' इति पाठः, तस्य 'ज्ञानमयी'—इत्यर्थः। 'मृदा वा दारुणा वाऽथ वस्त्रेणाप्यथ चर्मणा। लोहरत्नैः कृतं वापि पुस्तमित्यभिधीयते।' उत्कीर्णा=उत्कीरिता, प्रस्तरादौ निस्तक्ष्य रचिता, अपि, विप्रलभते=झटिति परित्यज्य वञ्चयति। श्रुता=आकर्णिता, अपि, अभिसन्धत्ते=अनुसन्दधाति। [श्रुतम् अस्ति अस्या इत्यर्थे 'अर्श आदिभ्योऽच्' इति सूत्रेण अच् प्रत्यये सति, श्रुता='श्रुतवती' इत्यर्थः। 'दुराचरणनिरोधक-ज्ञानवती अपी' त्यर्थः] चिन्तिता=आध्याता, अपि, वञ्चयति=प्रतारयति। अत्र विरोधाभासाख्योऽलङ्कारः।

एवम्विधयेति। एवंविधया=एतादृश्या, पूर्ववर्णितया, अपि, दुराचारया = दुष्टाचरणया, च, अनया=लक्ष्म्या, कथमपि=केनापि प्रकारेण, महता क्लेशेनेति भावः, दैववशेन=भाग्यवशेन, परिगृहीताः=स्वीकृताः, राजानः=भूपतयः, विक्लवाः=समाकुलाः, भवन्ति=सम्पद्यन्ते। सर्वाविनयाधिष्ठानताम्—सर्वेषाम् (=सकलानाम्) अविनयानाम् (=अशिष्टाचाराणाम्, दुर्बुद्धीनाम्) अधिष्ठानताम् (=अधिकरणताम्), च, गच्छन्ति=व्रजन्ति, प्राप्नुवन्ति।

पूर्वोक्तमेव समर्थयितुमाह—**तथा हीत्यादिना**। एतेषाम्=भूपतीनाम्, अभिषेकसमये=राज्या-

कदली=केला का पौधा है। साधुभाव = सज्जनता की वध्यशाला (समाप्त करने का घर) है और धर्मरूपी चन्द्रमण्डल की [उसको ग्रसित करने वाली] राहु की जीभ है। [मैं] उस (उस प्रकार के व्यक्ति) को नहीं देखता=जानता हूँ जो इस अपरिचिता लक्ष्मी द्वारा खूब आलिङ्गित न किया गया हो अथवा जिसे धोखा न दिया गया हो। यह निश्चित है कि यह लक्ष्मी चित्र में चित्रित होती हुई भी चल देती है। पुस्तमयी—मिट्टी लकड़ी या लोह आदि की बनी हुई भी [अथवा पुस्तक के रूप में रहती हुई भी] इन्द्रजाल का आचरण (अनेक व्यवहार) करती है। [पत्थर आदि में] खोदी गई (बनाई गई) भी धोखा देती है। [केवल] सुनी गई भी कपट करती है और केवल सोची गई भी ठग लेती है। इस (पूर्ववर्णित) प्रकार की इस दुराचारिणी लक्ष्मी द्वारा भाग्यवश स्वीकार किये गये (अनुग्रह के पात्र बनाये गये) भी राजा लोग व्याकुल हो जाते हैं और सभी प्रकार के अविनयों (अशिष्ट आचरणों) के आश्रय बन जाते हैं अर्थात् उनमें सभी प्रकार की बुराइयाँ आ जाती है। यह इस प्रकार है—अभिषेक के समय ही मानों मङ्गल-कलसों के जलों से

१. पुस्तकमय्यपि। २. दैवपरिगृहीताः। ३. विक्लवीभवन्ति। ४. एवैषाम्, एव चैषाम्।

कलशजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्य्यधूमेनेव मलिनीक्रियते[1] हृदयम्, पुरोहित-कुशाग्र-सम्मार्जनीभिरिवापह्रियते[2] क्षान्तिः, उष्णीषपट्ट[3]-बन्धेनेवाच्छाद्यते[4] जरागमनस्मरणम्, आतपत्र-मण्डलेनेवापसार्य्यते[5] परलोकदर्शनम्, चामरपवनैरिवापह्रियते सत्यवादिता,

---

भिषेककाले, एव, मङ्गलकलशजलैः=कल्याणघटसलिलैः, इव, दाक्षिण्यम्=औदार्यम्, प्रक्षाल्यते=धाव्यते, प्रक्षाल्य दूरीक्रियते इति भावः। नृपेषु प्रायः औदार्यं न दृश्यते। [दक्षिणः सरलोदारपर छन्दानुवर्तिषु।' इति शाश्वतः। भावे ष्यञ् प्रत्यये—दाक्षिण्यम्।] इवशब्देनोत्प्रेक्षाङ्कारः। 'एतेषाम्' इदं सर्वत्र योज्यम्।

अग्नीति। अग्नीत्यादिः—अग्निकार्यम् (=हवनादिकम्) तस्य धूमेन (=वह्निकेतनेन) इव, हृदयम्=चित्तम्, मलिनीक्रियते = मलीमसीक्रियते। नृपाः बाहुल्येन विकृतचित्ता एव भवन्तीति भावः। अत्रोत्प्रेक्षा।

पुरोहितेति। पुरोहितेत्यादिः—पुरोहितः (=पुरोधाः, आचार्यः) तस्य कुशाग्राणि (=दर्भाग्राणि), एव, सम्मार्जन्यः (=शोधन्यः) ताभिः, इव, शान्ति=क्षमा, राज्ञामिति शेषः, अपह्रियते= दूरीक्रियते। नृपाः सामान्यविषयेष्वपि युद्धार्थमुग्रा भवन्तीति भावः। अत्र रूपकोत्प्रेक्षयोः साङ्कर्यात् सङ्करः।

उष्णीषेति। उष्णीष-पट्टबन्धेन=उष्णीषम् (= मुकुटम्, मूर्धवेष्टनम्) तदेव पट्टबन्धः (= क्षौमवसनबन्धनम्) तेन, इव, जरागमनस्मरणम्—जरा (= वार्धक्यम्) तस्या आगमनस्य (=आगमस्य, प्राप्तेः) स्मरणम् (=स्मृतिः) आच्छाद्यते=आव्रियते। वयमपि वृद्धो भूत्वा निधनं प्राप्स्याम इति चिन्ता न कदापि भवति नृपाणामिति ते प्रायः स्वच्छन्दमेवाचरन्तीति भावः।

आतपत्रेति। आतपत्रमण्डलेन—आतपत्रम् (=छत्रम्) तस्य मण्डलम् (=निस्तलम्) तेन, इव, परलोकदर्शनम्=भवान्तरस्य ज्ञानम्, अपसार्यते=दूरीक्रियते। छत्रेणावृततया ते राजानः परलोकं द्रष्टुं न समर्था भवन्तीति भावः।

चामरेति। चामरपवनैः=प्रकीर्णकोत्थ-वायुभिः, इव, सत्यवादिता=तथ्यभाषकता, अपह्रियते= अपनीयते। व्यजनपवनेन यथा धूलिकणादयः दूरीक्रियन्ते तथैव राज्ञां सत्यवादिताऽपीति भावः। ते प्रायशोऽसत्यमेव भाषन्ते इति भावः।

ही इनकी उदारता (दाक्षिण्य) को धो दिया जाता है, मानो अग्निकार्य (यज्ञादि क्रिया) से [इनका] हृदय मलिन कर दिया जाता है, मानों पुरोहितों के कुशों की नोक (अग्रभाग) रूपी झाड़ू (संमार्जनी) से क्षान्ति (=सहनशीलता) बुहार दी जाती है, हटा दी जाती है। मानो उष्णीषपट्ट (पगड़ी) के बाँधने के द्वारा बुढ़ापा आने का स्मरण ढक दिया जाता है। (कभी बूढ़े होंगे—यह स्मरण ही नहीं रहता है।) मानों छत्रमण्डल द्वारा परलोक (स्वर्गलोक) का दर्शन (दिखाई देना, ज्ञान करना) दूर कर दिया जाता है। मानों चामर (पंखों) से उत्पन्न हवाओं द्वारा सत्यवादिता (सत्य बोलना) उड़ा दी जाती है, हटा दी जाती है। मानों बेंत की छड़ियों द्वारा गुण हटा (भगा)

---

१. मलिनीभवति। २. अपनीयते। ३. ···पट···। ४. अवाच्छाद्यते। ५. अपवार्यते, अपवर्यते।

वेत्रदण्डैरिवोत्सार्य्यन्ते गुणाः,जयशब्दकलकलरवैरिव[1] तिरस्क्रियन्ते साधुवादाः,ध्वजपटपल्लवैरिव परामृश्यते यशः।[2][तथा हि—][3]केचित् श्रम-वश-शिथिल-शकुनि-गल-पुट[4]-चपलाभिः खद्योतोन्मेष-मुहूर्त्त-मनोहराभिर्मनस्विजनगर्हिताभिः सम्पद्भिः प्रलोभ्यमाना धन-लवलाभावलेपविस्मृत-जन्मानोऽनेकदोषोपचितेन दुष्टासृजेव[5] रागावेशेन बाध्यमानाः, विविधविषय-ग्रास[6]-लालसैः

वेत्रेति । वेत्रदण्डैः = वेतसयष्टिभिः, इव, गुणाः = धैर्यादयः, उत्सार्यन्ते = दूरीक्रियन्ते । नृपाः बाहुल्येन गुणहीना एव भवन्तीति भावः ।

जयेति । जयेत्यादिः—जयशब्दस्य (= जय-जय-इत्याकारकध्वनिसमूहस्य) कलकलरवैः (= कोलाहलध्वानैः), साधुवादाः = हितवचनानि, यद्वा—सौजन्य-प्रशंसावचनानि, तिरस्क्रियन्ते = अनाद्रियन्ते । साधुवादापेक्षया जयशब्दश्रवणेऽभिरुचि प्रदर्शयन्तीति भावः ।

ध्वजेति ध्वजेत्यादिः—ध्वजाः (= वैजयन्त्यः) तेषां पटाः (= वस्त्राणि) तेषां पल्लवैः, (= प्रान्तैः) यद्वा—पटा एव पल्लवानि, (= किसलयानि) तैः, यशः (= कीर्तिः) परामृश्यते = (= प्रोञ्छ्यते । प्रायशः दुराचरणात् शनैः शनैः कीर्तिः तथैव लुप्यते यथा वस्त्रादिना शुभचिह्नानि प्रोञ्छ्यन्ते इति भावः । अत्र सर्वत्र उत्प्रेक्षाऽलङ्कारः । क्वचितु रूपकेण साङ्कर्यात् सङ्करोऽपीति बोध्यम् ।

पूर्वोक्तमेव प्रदर्शयति—**तथा हीत्यादिना** । तथा हि = एवं बोध्यम् । केचित् = केचन नृपाः, [अत्र 'विह्वलतामुपयान्ती'ति वक्ष्यमाणेन सम्बन्धः ।] श्रमेत्यादिः—श्रमवशेन (= प्रयासाधिक्येन) शिथिलम् (= श्लथम्) यत् शकुनेः (= मयूरादिपक्षिणः) गलपुटम् (= कण्ठदेशः) तद्वत् चपलाभिः (= चञ्चलाभिः) खद्योतेत्यादिः—खद्योतः (= ज्योतिरिङ्गणः) तस्य य उन्मेषः (= अवभासः, प्रकाशः) स इव मुहूर्तम् (= क्षणपर्यन्तम्) मनोहराभिः (= हृदयहारिणीभिः) किञ्चित्कालमेव प्रियाभिरित्यर्थः, अत एव हेतोः, मनस्विजनगर्हिताभिः—मनस्विनः (= ज्ञानिनः) जनाः (= लोकाः) तैः गर्हिताभिः (= निन्दिताभिः), एतादृशाभिः, सम्पद्भिः = धनादिसमृद्धिभिः, प्रलोभ्यमानाः = लोभं प्राप्यमाणाः, आकृष्यमाणा इति भावः ।

धनेति । धनेत्यादिः—धनस्य (= वित्तस्य) लवः (= लेशः) तस्य यो लाभः (=उपलब्धिः) तस्माद् योऽवलेपः (= अहङ्कारः) तेन विस्मृतानि (= विस्मरणं प्रापितानि) जन्मानि (= जनूंषि) यैस्ते तादृशाः । [धनस्मृत्यैव विस्मृतजन्मादि-सम्बन्धलोका इति भावः ।] अनेकदोषोपचितेन—अनेकैः (= नानाविधैः) दोषैः (= दूषणैः, वातपित्तकफविकारैः) उपचितेन (= वृद्धिं गतेन), दुष्टासृजा—दुष्टेन (= दूषितेन) असृजा (रक्तेन) इव = यथा, (अनेकदोषोपचितेन = कामक्रोधादिदोषसमूह-वर्धितेन), रागावेशेन—रागः (= इच्छा, अरुणिमा च) तेषाम् आवेशेन=अभिनिवेशेन, बाध्यमानाः = पीड्यमानाः । 'विह्वलतामुपयान्ती' त्यत्रान्वयो बोध्यः । अत्र सादृश्यात् पूर्णोपमा ।

दिये जाते हैं। मानों 'जय हो, जय हो' इस प्रकार के शब्दों के कोलाहल द्वारा साधुवाद (अच्छी बातें) तिरस्कृत कर दी जाती हैं और मानों ध्वजाओं के वस्त्रों द्वारा यश पोंछ कर साफ कर दिया जाता है।

और इस प्रकार—कुछ राजा लोग अत्यधिक थकान के कारण लटकी हुई (ढीली ढाली) किसी पक्षी की गर्दन (गलपुट) के समान हिलती हुई अर्थात् अस्थिर, जुगनू की चमक के समान केवल कुछ देर के लिए चमकने वाली, और मनस्वी (स्वाभिमानी) व्यक्तियों द्वारा गर्हित (निन्दित) सम्पत्ति से लुभाये जाते हुए, थोड़े से धन को प्राप्त कर लेने के अभिमान के कारण अपने जन्म को भूलते हुए, (अर्थात् अजन्मा, अमर ऐसा समझते हुए), [वात, पित्त, कफ] अनेक प्रकार के दोषों

---

१. कलकलैः । २. इदं क्वापि न दृश्यतेऽपि । ३. क्वचित् ।
४. ···पक्षपुट···। ५. दोषासृजेव । ६. विषयरसग्रास ।

पञ्चभिरप्यनेक-सहस्रसङ्ख्यैरिवेन्द्रियैरायास्यमानाः, प्रकृतिचञ्चलतया लब्धप्रसरेणैकेनापि[1] शतसहस्रतामिवोपगतेन मनसाऽऽकुलीक्रियमाणा विह्वलतामुपयान्ति। ग्रहैरिव गृह्यन्ते। भूतैरिवाभिभूयन्ते। मन्त्रैरिवावेश्यन्ते। सत्त्वैरिवावष्टभ्यन्ते। वायुनेव विडम्ब्यन्ते। पिशाचैरिव ग्रस्यन्ते। मदनशरैर्मर्माहता[2] इव मुखभङ्गसहस्राणि कुर्वते। धनोष्मणा पच्यमाना इव विचे-

विविधेति। विविधेत्यादिः—विविधाः (=नानाप्रकाराः) ये विषयाः (=शब्दस्पर्शादीन्द्रियविषयाः) तेषां ग्रासाः (=उपभोगाः)। यद्वा ते एव ग्रासाः (= कवलानि) तेषु लालसैः (=साभिलाषैः, लोलुपैः), पञ्चभिः=पञ्चसङ्ख्याकैः, चक्षुर्घ्राणादिभिरित्यर्थः, अपि, अनेकसहस्रसंख्यैः= बहुसहस्रसंख्यैः, इव, इन्द्रियैः=हृषीकैः, विषयज्ञानकरणैरित्यर्थः, आयास्यमानाः = परिक्लिश्यमानाः, स्वस्वविषयेषु प्रबलप्रेरणयेति शेषः।

प्रकृतीति। प्रकृतिचञ्चलतया—प्रकृत्या (=स्वभावेन, एव) चञ्चलतया (=चपलतया) कारणेन, लब्धप्रसरेण—लब्धः (=प्राप्तः) प्रसरः (=अवकाशः) येन तादृशेन, एकेन=अद्वितीयेन, सता, अपि, सहस्रताम् = सहस्रत्वम्, असंख्यत्वमित्यर्थः, उपगतेन = प्राप्तेन, इव, मनसा=चेतसा, आकुलीक्रियमाणाः=व्याकुलीक्रियमाणाः, विह्वलताम् = व्याकुलताम्, चञ्चलतां वा, उपयान्ति = उपगच्छन्ति, प्राप्नुवन्ति। अत्र क्रियोत्प्रेक्षा।

राज्ञां तदानीन्तनीमवस्थां वर्णयति—**ग्रहैरिति।** ते राजानः ग्रहैः = शनैश्चरादिभिः खेटैः, गृह्यन्ते=ध्रियन्ते, स्वप्रभाववशीक्रियन्ते, इव [अत्र सर्वत्र 'राजानः' इति संयोज्यम्, तच्च उक्तकर्मत्वेन प्रथमान्तमिति बोध्यम्।] भूतैः=देवयोनिविशेषैः, ['···भूतोऽमी देवयोनयः' इत्यमरः] रुद्रानुचरैः, सिंहादिभिर्वा, अभिभूयन्ते = आक्रम्यन्ते, इव,। मन्त्रैः=देवाद्यधिष्ठातृकशब्दविशेषैः, आवेश्यन्ते= आविष्टाः क्रियन्ते, इव। सत्त्वैः=सिंहादिहिंस्रप्राणिभिः, अवष्टभ्यन्ते=बलाद्गृह्यन्ते इव। वायुना= पवनेन, विडम्ब्यन्ते=इतस्ततो विचाल्यन्ते, इव। पिशाचैः=राक्षसैः ग्रस्यन्ते=भक्ष्यन्ते, इव। अत्र इवार्थस्य क्रियायामन्वयात् सर्वत्र क्रियोत्प्रेक्षाऽलङ्कार इति बोध्यम्।

अवस्थान्तराण्यपि दर्शयति—**मदनेति।** मदनशरैः = कामदेवबाणैः, मर्माहताः—मर्मसु (=सन्धिस्थलेषु) आहताः (=ताडिताः), इव, मुख-भङ्गसहस्राणि—मुखभङ्गानाम् (=आननविकाराणाम्) सहस्राणि (=दशशतीं, बहूनि), कुर्वते=विदधति। धनोष्मणा=वित्तोन्मादजन्यतापेन, पच्यमानाः=पाकविषयीक्रियमाणाः, इव, विचेष्टन्ते=विविधां चेष्टां कुर्वन्ति, विविधव्यापारान् कुर्वन्तीति

से बढ़े हुए, दोषों से युक्त रक्त के समान (अनेक प्रकार के काम, क्रोधादि दोषों से बढ़े हुए) राग (विषयासक्ति) के आवेश से (=आग्रह) से पीड़ित किये जाते हुए; विविध विषयरूपी ग्रासों की लालसा वाले (अर्थात् विषयों के उपभोग के लिये उत्कण्ठित) [इसलिये वास्तव में] पाँच होती हुई भी गिनती में हजारों प्रतीत होने वाली इन्द्रियों द्वारा पीड़ित किये जाते हुए, और स्वभाव से ही चञ्चल होने के कारण अवसर प्राप्त किये हुए [वास्तव में] एक होते हुए भी लाखों की संख्या को प्राप्त कर लेने वाले मन के द्वारा आकुल किये जाते हुए—व्याकुल होते रहते हैं। मानों (वे राजा लोग) [शनि आदि] ग्रहों द्वारा पकड़ लिये जाते हैं (अधीन कर लिए जाते हैं)। मानों भूतों (देवयोनिविशेष वालों) के द्वारा अभिभूत (तिरस्कृत) कर दिये जाते हैं, (वे राजाओं पर आरूढ़ हो जाते हैं)। मानों मन्त्रों द्वारा [भूत प्रेतादि से] आविष्ट कर लिये जाते हैं। मानों [सिंह

१. प्रसारेण। २. ···अभिहता इव।

न्ते। गाढप्रहाराहता[1] इवाऽङ्गानि न धारयन्ति । कुलीरा इव तिर्य्यक् परिभ्रमन्ति । अधर्म्म-भग्नगतयः पङ्गव इव परेण सञ्चार्य्यन्ते । मृषावाद-विपाक[2]-सञ्जात-मुखरोगा इवातिकृच्छ्रेण जल्पन्ति । सप्तच्छद-तरव इव कुसुम-रजोविकारैः पार्श्ववर्त्तिनां[3] शिरः शूलमुत्पादयन्ति ।

भाव: । गाढप्रहाराभिहताः—गाढः (=तीव्रः, प्रबलः) यः प्रहारः (=आघातः) तेन आहताः (= अभिहताः, ताडिताः) इव, अङ्गानि (= अवयवान्) न=नैव, धारयन्ति = धर्तुं वोढुं वा पारयन्ति । सर्वत्रोत्प्रेक्षैव बोध्या ।

कुलीरा इति । कुलीराः=कर्कटाः, इव, तिर्यक्=कुटिलम्, परिभ्रमन्ति=परिभ्रमणं कुर्वन्ति । सर्वैः सह कौटिल्यमेव प्रदर्शयन्तीति भावः । उपमात्र ।

अधर्मेति । अधर्मभग्नगतयः—अधर्मेण (=पापाचरणेन, दुष्कृतेन) भग्ना (=विनष्टा) गतिः (=गमनम्, सदाचारानुष्ठानम्) येषां ते तादृशाः सन्तः, पङ्गवः=खञ्जाः, इव, परेण=अन्येन, सचिवादिना, कर्णेजपादिना वा, सञ्चार्यन्ते = सञ्चारणं कार्यन्ते । ते स्वयमशक्ताः किमपि कर्त्तुमिति अन्येषां परामर्शेनैव किञ्चिदपि कर्तुं प्रभवन्तीति भावः । उपमात्र ।

मृषावादेति । मृषावादेत्यादिः—मृषावादः (=असत्यभाषणम्) तस्य विपाकः (=परिणामः) तेन सञ्जातः (=समुत्पन्नः) मुखरोगः (=आस्यव्याधिः) येषां ते तादृशाः सन्तः,इव, अतिकृच्छ्रेण—महता क्लेशेन, जल्पन्ति=भाषन्ते । उचितानुचितनिर्णयप्रसङ्गेऽपि उपेक्षया मौनमेवाश्रित्य स्वकर्त्तव्यं न पालयन्तीति भावः ।

सप्तच्छदेति । सप्तच्छदतरवः=सप्तपर्णवृक्षाः,इव, कुसुमरजोविकारैः-—कुसुमरजसाम् (= पुष्पपरागाणाम्) विकारैः (=तत्सम्पर्कजन्यपवनप्रकोपनैः), राजपक्षे—कुसुमानि (=नेत्ररोगाः अवहेलनासूचकनेत्रभङ्गीविशेषाः) एव रजोविकाराः (=रजोगुणविकृतयः) तैः, पार्श्ववर्तिनाम्=समीपस्थायिनाम्, शिरःशूलम्=शिरोवेदनाम्, उत्पादयन्ति=जनयन्ति । सप्तपर्णपुष्परजसः सम्पर्केण शिरोवेदनोत्पत्तिर्यथा तथैव राज्ञां नेत्रविकारलक्ष्यीभूताः समीपवर्तिनः जनाः पीड्यन्ते इति भावः । ["कुसुमं स्त्रीरजोनेत्ररोगयोः फलपुष्पयोः ।" इति मेदिनी ।] अत्रोपमा ।

आदि हिंसक] सत्त्वों=जन्तुओं द्वारा दबोच (पकड़) लिए जाते हैं । मानों हवा द्वारा इधर-उधर हिला डुला दिये जाते हैं । मानों पिशाचों द्वारा ग्रसित (गृहीत) कर लिए जाते हैं । कामदेव के बाणों द्वारा मर्मस्थलों पर ताड़ित होते हुए से हजारों मुख-भंगिमायें (विविध प्रकार की मुखाकृतियाँ) बनाते हैं । मानों धन की गर्मी के द्वारा उबाले जाते हुए से विविध चेष्टाएँ करते हैं । मानों गाढ़ (भारी) प्रहार से आहत होते हुए अपने अंगों को नहीं संभाल (धारण कर) पाते हैं । केंकड़ों के समान टेढ़े-मेढ़े (कुटिल रूप में) चलते हैं । अधर्म के कारण भंग हुई (समाप्त हुई) गति (क्रियाशीलता) वाले होते हुए पंगुओं (लंगड़ों) के समान दूसरों के द्वारा संचारित किये (चलाये) जाते हैं । [प्रायः] मानों असत्य बोलने के फलस्वरूप उत्पन्न हुए मुखरोग वाले वे बहुत कष्ट से बोल पाते हैं । जैसे सप्तपर्ण वृक्ष पुष्पों के पराग के विकार से समीपवर्त्ती लोगों के शिर में पीड़ा उत्पन्न कर देते है, उसी प्रकार वे कुसुम (नेत्ररोगविशेष) रूप रजोगुण-परिणामों से समीपवर्त्ती लोगों के सिर दर्द पैदा कर डालते हैं ।

१. अभिहता इव । २. मृषावाद-विष··· । ३. आसन्नवर्तिनाम् ।

आसन्नमृत्यव[1] इव बन्धुजनमपि नाभिजानन्ति। उत्कुपित-लोचना[2] इव तेजस्विनो नेक्षन्ते। कालदष्टा इव महामन्त्रैरपि न प्रतिबुध्यन्ते। जातुषाभरणानीव[3] सोष्माणं न सहन्ते। दुष्टवारणा इव महामानस्तम्भनिश्चलीकृता[4] न गृह्णन्त्युपदेशम्। तृष्णाविषमूर्च्छिता:[5] कनकमयमिव

आसन्नेति। आसन्नमृत्यव: —आसन्न: (=समीपवर्त्ती) मृत्यु: (=मरणम्, प्राणवियोग:) येषां ते तादृशा:, जना:, इव, बन्धुजनम्=स्वजनं पुत्रादिकम् अपि, न = नैव, अभिजानन्ति=परिचिन्वन्ति। सामान्यलोका: बुद्धिलोपात् राजानस्तु दर्पात् तथाऽचरन्तीति साम्यम्। उपमात्र।

उत्कुपितेति। उत्कुपितलोचना: – उत्कुपिते (=रुग्णे) लोचने (=नयने) येषां तादृशा: जना, इव, तेजस्विन: = प्रतापवत:, न = नैव, ईक्षन्ते=विलोकयन्ति, रुग्णा: अशक्त्या, राजानश्च ईर्ष्यया न पश्यन्तीति भाव:।

कालदष्टा इति। कालदष्टा—कालेन (= महाविषभुजङ्गेन) यद्वा—काले = निषिद्धकाले, दष्टा: (= कृतदंशना:, भक्षिता:), इव, महामन्त्रै: = गारुडादि-देवतावाचकशब्दसमूहविशेषै:, अपि, न = नैव, प्रतिबुध्यन्ते = प्रबोधं प्राप्नुवन्ति, पक्षे—महामन्त्रै:—षाड्गुण्यविषयकोत्तमपरामर्शैरपि, न, प्रतिबुध्यन्ते = उचितं विधेयमनुजानन्ति। मृत्युसमये समागते कालभुजगेन भक्षिता जना: यथा केनापि महामृत्युञ्जयमन्त्रेणापि न प्राणरक्षां कर्तुं शक्नुवन्ति तथैव हितकारिभि: सन्धिविग्रहादिसमुपदेश-ववचनैरपि राज्ञां बुद्धि: सफलतां न गच्छतीति भाव:।

जातुषेति। जातुषाभरणानि—जातुषाणि (= लाक्षानिर्मितानि) आभरणनि (= आभूषणानि) इव, सोष्माणम् = तेजस्विनम्, अग्निम्, न = नैव, सहन्ते=मृष्यन्ति। यथाऽग्निसम्पर्के एव जातुषाभरणानि द्रवीभूय विनश्यन्ति तथैव प्रतापवतां सम्पर्के राज्ञां सत्त्वं क्षीयते।

दुष्टेति। दुष्टवारणा: = मदोन्मत्तगजा:, इव, महामान-स्तम्भ-निश्चलीकृता:—महान् (= अतिशयित:) य: मान: (= दर्प:) स एव स्तम्भ: (= स्थूणा) तेन निश्चलीकृता: (= स्तब्धतामधिगता:) उपदेशम् = हितकारिवचनम्, न = नैव, गृह्णन्ति = शृण्वन्ति। पक्षे—महत् (= दीर्घम्) मानम् (= प्रमाणम्) यस्य स तादृश य: स्तम्भ: (= आलानस्तम्भ:) तेन निश्चलीकृता: (= स्थिरीकृता:) नद्धा:, सन्त:, उपदेशम् = हस्तिपकवचनम्, नैव, शृण्वन्ति = परिपालयन्ति। साम्यप्रतिपादनादुपमा।

तृष्णेति। तृष्णेत्यादि:—तृष्णा (= धनादिलिप्सा) एव विषम् (= गरलम्) तेन मूर्च्छिता:

जिनकी मृत्यु समीप में आ गई है ऐसे (मरणासन्न) लोगों के समान वे अपने बन्धु जनों को भी नहीं पहचान पाते हैं, अति दु:खी (रुग्ण या मिचमिचाते) नेत्रों वाले के समान तेजस्वियों को नहीं देख पाते हैं, (तेजस्वियों की आँख से आँखे नहीं मिला पाते हैं;) कालसर्प द्वारा डसे गये व्यक्ति के समान महामन्त्रों (गरुड़-सम्बन्धी मन्त्रों) से भी पुन: जीवित (ज्ञानयुक्त) नहीं किये जाते हैं। लाख के आभूषणों के समान गर्मी (तेजस्वी लोगों) नहीं को सहन कर पाते हैं। जैसे उन्मत्त हाथी बहुत बड़े बन्धनस्तम्भ से बाँधकर निश्चल किये गये (होकर अपने महावत की बातें नहीं मानते हैं) वैसे ही अपने उत्कट अभिमान के कारण उत्पन्न स्तब्धता (जड़ता) के कारण निश्चल होते हुए वे [दिये जाने वाले] उपदेश को नहीं सुनते हैं, उस ओर ध्यान ही नहीं देते हैं। तृष्णारूपी विष से मूर्च्छित

१. पुर:स्थितं बन्धुजनम्। २. उत्कम्पित०। ३. जातुषा इव। ४. महत्मान, महालानकृता अपि न। ५. अतितृष्णावेगमूर्च्छिता।

सर्वं पश्यन्ति। इषव इव पानवर्द्धिततैक्ष्ण्याः[1] परप्रेरिता विनाशयन्ति। दूरस्थितान्यपि फलानीव दण्डविक्षेपैर्महाकुलानि शातयन्ति। अकालकुसुमप्रसवा इव मनोहराकृतयोऽपि लोकविनाश-हेतवः। श्मशानाग्नय इवातिरौद्रभूतयः। तैमिरिका इवादूरदर्शिनः। उपसृष्टा इव क्षुद्राधिष्ठित-

(=मोहमुपगताः) सन्तः, सर्वम् = सकलम्, पदार्थमात्रमिति भावः। कनकमयम् = सुवर्णमयम्, इव, पश्यन्ति = विलोकयन्ति। अत्र रूपकोत्प्रेक्षयोः सङ्करः।

इषव इति। इषवः = बाणाः इव, पानवर्द्धिततैक्ष्ण्याः—पानम् (= निशानघर्षणम्) तेन वर्द्धितम् (= वृद्धिगतम्) तैक्ष्ण्यम् (= निशितत्वम्) येषां ते तादृशाः, पक्षे—पानम् (= मद्यादि-सेवनम्) तेन वर्द्धितं तैक्ष्ण्यम् (= मदक्रूरत्वम्) येषां ते तादृशाः सन्तः, परप्रेरिताः—परेण (= चापेन, धनुर्धारिणा वा) प्रेरिताः (= प्रयोजिताः), पक्षे—परैः = धूर्तादिभिः प्रेरिताः = प्रोत्साहिताः सन्तः, विनाशयन्ति = लक्ष्याणि नाशयन्ति, पक्षे—प्रजादीन् विनाशोन्मुखं कुर्वन्ति। उपमात्र।

दूरेति। दण्डविक्षेपैः = यष्टिप्रहारैः, पक्षे—दण्डरूपचतुर्थोपायैः, दूरस्थितानि = विप्रकृष्टवर्तीनि, अपि, महाकुलानि = विशालवंशोत्पन्नलोकान्, दूरस्थितानि, फलानि = आम्रादिफलानि, इव, शातयन्ति = पातयन्ति, पक्षे—नाशयन्ति। यथा दण्डप्रहारैः फलानां पातनं तथैव दण्डनीत्या प्रशस्तवंशीयजनानां पीडनं क्रियते राजभिरिति भावः। अत्रोपमा।

अकालेति। अकालकुसुमप्रसवाः—अकाले (= असमये) ये कुसुमानाम् (= पुष्पाणाम्) प्रसवाः = उद्गमाः), ते, इव, मनोहराकृतयः—मनोहराः (= चित्ताकर्षकाः) आकृतयः (= आकाराः) येषां ते तादृशाः, सन्तः, अपि, लोकविनाशहेतवः—लोकस्य (= संसारस्य जनस्य वा) विनाशस्य (= क्षयस्य) हेतवः (= कारणानि), भवन्तीति शेषः। अकाले कुसुमोद्गमस्योत्पात-निमित्तत्वं प्रसिद्धम्। तथा चोद्धृतं भानुचन्द्रेण—"द्रुमौषधिविशेषाणामकाले कुसुमोद्गमः। फलप्रसवयोर्बन्ध्यं महोत्पातं विदुर्बुधाः। एवञ्च मनोहारिण्याकृत्याऽपि ते राजानो लोकविनाशसूचका एवेति बोध्यम्। अत्रोपमा।

श्मशानेति। श्मशानाग्नयः—श्मशानम् (= प्रेतवनम्) तस्य अग्नयः (= वह्नयः), इव, अतिरौद्रभूतयः—अतिरौद्राः (= परेषामत्यन्तभीतिकारिकाः) भूतयः (= भस्मानि) येषां ते तादृशाः, पक्षे—अतिरौद्रा भूतयः (= सम्पत्तयः) येषां ते तादृशाः। ['भूतिर्भस्मनि सम्पत्ति-हस्ति-शृङ्गारयोः स्त्रियाम्।' इति मेदिनी।]

तैमिरिका इति तैमिरिकाः—तिमिरम् (= नेत्ररोगविशेषः) तत् संजातं येषां ते तादृशाः, तिमिरनामक-रोगाक्रान्ता इति भावः, अदूरदर्शिनः = विप्रकृष्टस्थवस्तुविलोकनशक्तिशून्या इति भावः। तैमिरिका इव दूरवर्त्तिनं हिताहितं वेत्तुं न समर्था इति भावः। अत्राप्युपमा।

किये गए वे सभी ओर या सभी पदार्थों को स्वर्णमय ही देखते हैं। जैसे बाण पान (शान रखने वाले पत्थर के घर्षण) से तीखे होते हुए पर = धनुष से छोड़े जाने पर दूसरों को मार डालते हैं वैसे ही वे [मदिरा आदि के] पीने से और अधिक क्रूर होते हुए दूसरों (चुगलखोरों आदि) के द्वारा प्रेरित होने पर दूसरों का विनाश कर डालते हैं। जैसे लोग दूर (बहुत ऊँचाई पर) लटकते हुए (स्थित) आम आदि फलों को डंडों के प्रहारों से [नीचे जमीन पर] गिरा देते हैं वैसे ही वे दूर रहने वाले भी बड़े-बड़े कुलों [के लोगों] को दण्डरूप चतुर्थ उपाय के माध्यम से अर्थात् बहुत अधिक दण्ड लेकर नष्ट कर देते हैं। असमय में फूलने वाले फूल जैसे सुन्दर आकृति वाले होते हुए भी लोगों के विनाश के कारण होते है वैसे ही वे भी सुन्दर आकार वाले होते हुए भी लोगों के विनाश के कारण बनते हैं।

१. प्रसयः, प्रसवः, प्रगमयः। २. पानक्ष्याः।

भवनाः। श्रूयमाणा अपि प्रेतपटहा इवोद्वेजयन्ति। चिन्त्यमाना अपि महापातकाध्यवसाया इवोपद्रवमुपजनयन्ति। अनुदिवसमापूर्य्यमाणाः पापेनेवाध्मातमूर्तयो भवन्ति। तदवस्थाश्च व्यसनशतशरव्यतामुपगता[1] वल्मीकतृणाग्रावस्थिता[2] जलबिन्दव इव पतितमप्यात्मानं

उपसृष्टा इति। उपसृष्टाः = रतिसंलग्ना वेश्याः, इव, क्षुद्राधिष्ठितभावनाः – क्षुद्रैः (= नीचलोकैः) अधिष्ठितम् (= आश्रितम्) भवनम् (= सदनम्) येषां ते तादृशाः, पक्षे—क्षुद्रैः = विटादिभिः, अधिष्ठितं भवनं यासां ताः तादृश्यः। [भानुचन्द्रस्तु—"उपसृष्टाः = बहिष्कृता इव" इति व्याचख्यौ।]

श्रूयमाणा इति। श्रूयमाणाः = आकर्ण्यमानाः, श्रवणगोचरीभूताः, अपि, प्रेतपटहाः = मृतसंस्कारकालिकढक्काशब्दाः, इव, उद्वेजयन्ति = उद्वेगं, वैकलव्यं जनयन्ति। यथा प्रेतपटहानां श्रवणे उद्वेगो जायते तथैव राज्ञां वचनादिश्रवणेऽपीति साम्यादुपमा। प्रेतपटहवादनं काश्यादौ लोकाचारः। उपमात्र।

चिन्त्यमाना इति। चिन्त्यमानाः = मनसि स्मर्यमाणाः, अपि, महापातकाध्यवसायाः—महापातकानाम् (= ब्रह्महत्यादीनाम्) अध्यवसायाः (= उद्योगाः), इव, उपद्रवम् = चित्तस्योद्विग्नताम्, उपजनयन्ति = उत्पादयन्ति। महापातकानां स्मरणेऽपि मनसि यथा भयं जायते तथैव राज्ञां स्मरणेऽपीति साम्यम्। तेनोपमा। मनुना महापातकलक्षणमेवमुक्तम्—"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गश्चापि तैः सह॥" (मनुः ११।५४)

अनुदिवसमिति। अनुदिवसम् = प्रतिदिनम्, पापेन = दुष्कृतेन, आपूर्यमाणाः = भ्रियमाणाः, इव, आध्मातमूर्तयः = स्फीतशरीराः, स्थूलदेहाः, भवन्ति = सम्पद्यन्ते। एतेन किं भवतीत्याह—तदवस्थाश्चेति। तदवस्था = ताः (= पूर्ववर्णिताः) अवस्थाः (= दशाः) येषां ते तादृशाः, च, व्यसनशतशरव्यताम्—व्यसनशतस्य (= कामक्रोधादिसमुत्पादितदोषसमूहस्य) शरव्यताम् (= लक्ष्यताम्) उपगताः = प्राप्ताः, व्यसनलक्ष्यीभूता इति भावः। वल्मीकतृणाग्रावस्थिताः—वल्मीकम् (= कीटविशेषनिःसारितमृत्पुञ्जः) तत्र तृणाग्रे (= उत्पन्नघासाद्यग्रभागे) अवस्थिताः (= विद्यमानाः), जलबिन्दवः = सलिलपृषताः, इव, पतितम् = स्वधर्मभ्रष्टम्, पृथिव्यां समागतम्, अपि, आत्मानम् =

श्मशान की अग्नि जैसे अत्यन्त भयानक (भूति) राख वाली होती है वैसे ही वे अत्यन्त भयानक विभूति (सम्पत्तियों) वाले होते हैं। तिमिर (नेत्ररोग विशेष) से ग्रस्त व्यक्ति जैसे दूर स्थित (पदार्थ) को नहीं देख पाते हैं वैसे ही वे दूर स्थित (स्वर्ग आदि) को नहीं देख पाते हैं, नहीं समझ पाते हैं। उपसृष्ट (रतिक्रीडा-लग्न वेश्या या उत्पातादियुक्त व्यक्ति) जैसे क्षुद्रों (नीचों, मधुमक्खी या विटादि) से अधिष्ठित घरों वाले होते हैं वैसे वे भी क्षुद्रों से अधिष्ठित भवनों वाले होते हैं। [शवयात्रा के साथ बजाये जानेवाले] प्रेतपटह जैसे [केवल] सुने जाते हुए भी उद्वेग (घृणा या व्याकुलता) को उत्पन्न करते हैं वैसे ही वे अर्थात् राजाओं की बातें सुनी जाती हुई भी मन को उबा देती हैं, कष्टयुक्त कर देती है। वे याद किये जाते हुए भी ब्रह्महत्या आदि महापातकों के उत्साह के समान उपद्रव = मानसिक अशान्ति उत्पन्न कर देते हैं। वे प्रतिदिन मानों पाप से भरे जाते हुए से मोटे शरीर वाले हो जाते हैं और इस प्रकार (पूर्ववर्णित) अवस्थाओं वाले होते हुए वे राजा लोग सैकड़ों [द्यूत, मदिरापान आदि] व्यसनों के लक्ष्यभाव को प्राप्त करते हुए अर्थात् लक्ष्य बनते हुए गिरते हुए भी अपने को उसी प्रकार नहीं जान पाते हैं जिस प्रकार वल्मीक (दीमकों द्वारा बनाये गये मिट्टी के

1. ...शरव्यताम्...। 2. ...स्थिता...।

नावगच्छन्ति ।

अपरे तु—स्वार्थनिष्पादनपरैर्धन-पिशित-ग्रास-गृध्रै रास्थान-नलिनीबकैः—[1] द्यूतं विनोद- इति, परदाराभिगमनं वैदग्ध्यमिति, मृगया[2] श्रम इति, पानं विलास इति, प्रमत्तता[3] शौर्य्य-

स्वम्, न=नैव, अवगच्छन्ति=जानन्ति । यथा बल्मीके जलपतनेऽपि तस्य शुष्कतया न प्रतीतिस्तथैव मोहाव् पतनकालेऽपि नात्मप्रतीतिः राज्ञामिति भावः । अत्राप्युपमा ।

इदं बोध्यम्—पूर्ववाक्येषु क्वचित् कर्मत्वेन क्वचिच्च कर्तृत्वेन राजपदार्थस्यान्वयात् परस्मैपदमा- त्मनेपदं च द्रष्टव्यम् ।

राजादीनां व्यसनान्येवमाह मनुः—"मृगयाऽक्षो दिवास्वप्नो परिवादः स्त्रियो मदः । तौर्यत्रिकं वृथाऽटया च कामजो दशको गणः" पैशुन्यं साहसं द्रोह ईर्ष्याऽसूयाऽर्थदूषणम् । वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ [मनु० ७।४७-४८]

राज्ञां पार्श्ववर्त्तिनो धूर्तास्तेषां दोषानपि गुणपक्षमध्यारोपयन्तः स्तुतिभिस्तान् मूर्खतां प्रापय्य सर्वजनस्योपहासपात्रत्वं कुर्वन्तीति विचार्य धूर्तानां वैशिष्ट्यं प्रथमं वर्णयति—**अपरे इति** । अपरे=अन्ये केचन राजानः, तु, ["प्रतार्यमाणाः ··· उपहास्यतामुपयान्ती"ति वक्ष्यमाणेनान्वयः ।] स्वार्थेत्यादिः— स्वस्य (=आत्मनः) अर्थः (=प्रयोजनम्) तस्य यत् निष्पादनम् (=सम्पादनं, पूरणम्) तस्मिन् परैः (= निरतैः) धनेत्यादिः—धनम् (= वित्तम्) एव पिशितम् (= मांसम्) तस्य ग्रासे (=भक्षणे, ग्रहणे वा) गृध्रैः (= दूरदृग्भिः पक्षिविशेषैः, तत्तुल्यैरित्यर्थः), आस्थानेत्यादिः— आस्थानम् (=सभामण्डपः) एव नलिनी (=पद्मिनी) तस्यां बकैः (=कह्वैः, पक्षिविशेषैः) । यथा धूर्तबकपक्षिणो नलिनीमाश्रित्याच्छादितदेहाः सत्यवसरे झटित्येव मीनान् चञ्चुपुटेन गृहीत्वा भक्षयन्ति तथैव धूर्ता अपि राज्ञः आश्रित्यान्यान् सरलान् जनान् प्रतारयन्तीति भावः । अत्र रूपकम् । [इमानि पदानि धूर्तैरिति वक्ष्यमाणस्य विशेषणानीति बोध्यम् ।] अत्र परम्परितरूपकमलङ्कारः ।

केन रूपेण दोषे गुणानध्यारोपयन्तीति वर्णयति—**द्यूतमिति** । द्यूतम् = दुरोदरम्, विनोदः = क्रीडासाधनम्, मनोरञ्जनमिति भावः, इति । वस्तुतस्त दोष एवेदम् । परदाराभिगमनम्—परदाराणाम् (=अन्येषां कामिनीनाम्) अभिगमनम् (= संसर्गः, संभोगो वा) वैदग्ध्यम्= चातुर्यम्, इति । वस्तु- तस्तु पातकमेवैदम् । मृगया =आखेटः, श्रमः =व्यायामः, इति=एवम् । अत एव अभिज्ञानशाकुन्तले— "मिथ्यैव व्यसनं वदन्ति मृगयामीदृग् विनोदः कुतः ।" इत्युक्तम् । वस्तुतस्तु प्राणिहिंसात्वात् मृगया पापसाधनमेव । पानम् =मदिरादिसेवनम्, विलासः = विलसितम्, इति । वस्तुतस्तु पातकमेवेदमिति सर्वत्र निर्दिष्टम् । प्रमत्तता =अनवधानता, क्षीबता वा, शौर्यम् = शूरता, इति । वस्तुस्तु गुणादर्शना-

ढेर) के ऊपर उत्पन्न घास आदि के अग्रभाग में स्थित जल की बूंदें [गिरती हुई भी अपने को नहीं जान पाती हैं क्योंकि वे उस मृत्पुञ्ज में सोख लीं जाती हैं] ।

और दूसरे कुछ राजा लोग—अपने स्वार्थ की सिद्धि करने में लगे हुए, धनरूपी मांस को पकड़ने मे गीध के समान, (तथा) [राजा के] सभाभवन रूपी कमलिनी में [छिपकर या घेर कर बैठे हुए] बगुलों के समान दुष्ट, ठगने में कुशल धूर्तों के द्वारा—द्यूत (जुआ खेलना) विनोद (मन का बहलाना) है, अन्यों की स्त्रियों से संसर्ग करना विदग्धता (चतुरता) है, शिकार खेलना श्रम (व्यायाम) है, मदिरापान विलास है, प्रमत्तता (अनवधानता, लापरवाही) शूरता है अपनी

१. ···धूर्तबकैः । २. मृगयां । ३. प्रमत्तता ।

मिति, स्वदारपरित्यागो[1]ऽव्यसनितेति, गुरुवचनावधीरणमपरप्रणेयत्वमिति, अजितभृत्यता[2] सुखोपसेव्यत्वमिति, नृत्य-गीत-वाद्य[3]-वेश्याभिसक्ती[4] रसिकतेति[5], महापराधाकर्णनं[6] महानुभावतेति, पराभवसहत्वं[7] क्षमेति, स्वच्छन्दता[8] प्रभुत्वमिति, देवावमाननं महासत्त्वतेति,

दिकं महादोष एव । स्वदार-परित्यागः = निजस्त्रीत्यागः, अव्यसनिता = अनासक्तिः, इति । वस्तुतस्तु धर्मविरुद्धमेवैतदाचरणम् । गु वचनावधीरणम्—गुरुः (= हिताहितप्राप्तिपरिहारोपदेष्टा) तस्य वचनम् (= उपदेशः) तस्य अवधीरणम् (= उपेक्षा) अपर-प्रणेयत्वम् = अन्यानधीनत्वम्, इति,। 'वश्यः प्रणेयः' इति कोशः। हितकारिवचनोपेक्षा अभ्युदय-विनाशिकी एवेति सर्वत्र दृश्यते। अजितभृत्यता = अनायत्तीकृतानुचरता, [यस्य भृत्या जिता अधीना न भवन्ति स राजा स्वेष्टं साधयितुं न प्रभवतीति भृत्यनियन्त्रणमनिवार्यम् ।] सुखोपसेव्यत्वम्—सुखेन (= अनायासेन, स्वेच्छया) उपसेव्यत्वम् (= उपसेवनीयत्वम्, स्वस्येति शेषः), इति । वस्तुतस्तु अजितभृत्यता महान् दोषः, राज्यविनाश-हेतुश्चेति विचार्य भृत्येपु सम्यगधिकारो नियन्त्रणञ्चातीवावश्यकम् । राज्ञः सारल्ये उपेक्षाभावेन च भृत्याः तस्य मृत्युकारणमपि भवितुमर्हन्ति । नृत्येत्यादिः—नृत्यम् (= नाट्यम्) गीतम् (= गानम्), वाद्यम् (= वादित्रम्), वेश्या (= वारनारी, गणिका) च—एतासु अभिसक्तिः (= समासक्तिः) रसिकता = रसिकत्वम्, रसाभिज्ञत्वम्, इति । वस्तुतस्तु अतिशयनिरतता पतन-कारणमेवेति बोध्यम् ।

महापराधेति । महापराधेत्यादिः—महापराधानाम् (= ब्रह्महत्यादि-महापातकानाम्) आकर्णनम् (= श्रवणम्), महानुभावता = महाधर्मिष्ठता, महाप्रभावशालिता, इति । वस्तुतस्तु महापातकानामाकर्णनापेक्षया तेषां निराकरणाय तद्विषये दण्डदानाय च सावधानेन भाव्यमिति भावः। पराभवसहत्वम्—पराभवः (= अन्यविहिततिरस्कारः) तस्य सहत्वम् (= मर्षणीयत्वम्) क्षमा = तितिक्षा, इति । वस्तुतस्तु राज्ञा कदापि कथमपि स्वतिरस्कारो न क्षन्तव्यः। अन्यथा तस्य क्लीबता प्रसिद्धा भूत्वा विनाशहेतुर्भविष्यतीति पराभवकर्ता समुचितरूपेण दण्डनीय एवेति नीतिरतिप्रसिद्धा। स्वच्छन्दता = स्वेच्छाचारिता, प्रभुत्वम् = स्वतन्त्रत्वम्, इति । वस्तुतस्तु स्वच्छन्दचारिणो विनाशः सुनिश्चित इति महानयं दोष एवेति भावः। देवावमाननम्—देवानाम् (= शिवादिदेवतानाम्) अवमाननम् (= तिरस्कारः) महासत्त्वता—महाशक्तिमत्ता, इति । वस्तुतस्तु देवावमानेन विनाशः सद्योभावीति लोके सर्वत्र दृश्यते । तेन तस्य राज्ञोऽपि स निश्चित इति बोध्यम् । बन्दिजनख्यातिः—

विवाहित पत्नियाँ छोड़ देना व्यसन का अभाव (व्यसनों में अनासक्ति) है, गुरुजनों के वाक्यों का अनादर करना दूसरों के द्वारा शासित न होना है, [अपराध कर देने पर भी] अपने नौकरों को दण्ड न देना (नौकरों को अपने नियन्त्रण में न रखना) अपना सरलता से सेवायोग्य होना है, नाच, गाना, बजाना (संगीत) और वेश्याओं में आसक्त रहना रसिक होना है, बड़े-बड़े अपराधों (महापातकों) का सुनना (महान् अपराधों को सुनकर भी उनके लिए समुचित दण्ड न देना) महान् प्रभाव होना है, [अपनी] पराजय सह लेना क्षमा है, स्वच्छन्दता (मनमानापन) प्रभुता (अपना स्वामित्व-प्रदर्शन) है, देवताओं का अपमान करना अतिशय वीरता है, बन्दीजनों द्वारा की

---

१. परित्यागं, परित्यागेषु । २. भृत्यताम् । ३. नृत... । ४. प्रभिसक्ति ।
५. रसिकतामिति । ६. महापराधावकर्णनम्, महापराधानवकर्णनम् ।
७. परिभवसहत्वम् परभवमहत्वम् । ८. स्वच्छन्दतां ।

बन्दिजनख्यातिर्यश[1] इति, तरलता[2] उत्साह इति, अविशेषज्ञता[3] अपक्षपातित्वमिति—दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वयमपि विहसद्भिः प्रतारणकुशलैर्धूर्त्तैरमानुषलोकोचिताभिः[4] स्तुतिभिः प्रतार्य्यमाणा वित्तमदमत्तचित्ता निश्चेतनतया[5] तथैवेत्यात्मन्यारोपितालीकाभिमाना[6]

बन्दिजनाः (= स्तुतिपाठकाः) तैः कृता ख्यातिः (= स्वप्रसिद्धिः) यशः = कीर्तिः। न तु सा वास्तविकीति तया दर्पोऽनुचित एवेति भावः। तरलता = आशुकारिता, सर्वकार्येष्वेति शेषः, उत्साहः = अध्यवसायः, प्रगल्भता, इति। वस्तुतस्तु अविचारितानुष्ठानं प्रायो विनाशकरमेवेति भावः। अत एवोक्तं किरातार्जुनीये "सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।" इत्यादि। अविशेषज्ञता = विशेषाविशेषानभिज्ञता, अपक्षपातित्वम् = पक्षपातशून्यत्वम्, इति। वस्तुतस्तु विशेषाविशेषौ विचार्यैव पुरस्कारो दण्डो वा प्रदातव्यः। सर्वत्र समदृष्टिना तु न न्यायो विधातुं शक्यते। अत एवोक्तं "निर्विशेषं यदा राजा समं सर्वेषु वर्तते। तदोद्यमसमर्थानामुत्साहः परिहीयते॥" इति वचनाद् योग्यजनसम्मानेनैवेष्टिसिद्धिरिति भावः। इति = पूर्वोक्त रीत्या, दोषान् = दूषणानि, अपि, गुणपक्षम् = गुणपङ्क्तिम् अध्यारोपयद्भिः = अन्तर्भावं विदधद्भिः, मिथ्या प्रशंसद्भिरिति भावः। अन्तः = स्वचेतसि, स्वयमपि = आत्मना, अपि, विहसद्भिः = उपहसद्भिः, [मम चाटूक्तिभिरयं राजा प्रतारित इति ममेष्टसिद्धिर्निश्चितेति ज्ञात्वा मनसि प्रसन्नतामनुभवद्भिश्चटुकारैरिति भावः], प्रतारण-कुशलैः = प्रवञ्चनानिपुणैः, धूर्त्तैः = वञ्चकैर्जनैः, अमानुषेत्यादिः—अमानुषलोकः (= मानुषलोकाद् भिन्नः, देवलोक इति भावः) तस्य उचिताभिः (= योग्याभिः) स्तुतिभिः = प्रशंसाभिः, श्लाघाभिः, प्रतार्यमाणाः = वञ्च्यमानाः, वित्तेत्यादिः—वित्तम् (= धनम्) तस्य यो मदः (= दर्पः) तेन मत्तम् (= उन्मत्तम्) चित्तम् (= स्वान्तम्) येषां ते तादृशाः, सन्तः, निश्चेतनतया—निर्गता (= निष्क्रान्ता) चेतना (= ज्ञानम्) यस्मात् तस्य भावस्तत्ता, हेतुना। तथैव = एतैर्जनैर्वयं यादृशाः वर्णितास्तेनैव प्रकारेण स्मः, इति = एवं रूपेण, आत्मनि = स्वस्मिन्, आरोपितालीकाभिमानाः—आरोपितः (= आरोपविषयीकृतः, कल्पितः) अलीकाभिमानः (= मिथ्याभिमानः) येषां ते तादृशाः, मर्त्यधर्माणः—मर्त्यस्य (= मरणशीलस्य मनुष्यस्य) धर्मः (= जन्ममरणादिः) येषां ते तादृशाः, अपि ["धर्मादनिच् केवलात्" इति सूत्रेणा-

गई स्तुति (प्रशंसा) कीर्ति है, आशुकारिता (उतावलापन) उत्साह है, और विशेष का ज्ञान न करना (गुणी या मूर्ख की पहचान न कर सकना) पक्षपात का अभाव है—इस प्रकार से दोषों को भी गुणपक्ष में अध्यारोपित करते हुए, स्वयं भी अपने मन में (भीतर ही भीतर) हँसते हुए, ठगने में सफल धूर्तों के द्वारा मनुष्यलोक में न हो सकने वाली अर्थात् देवलोक-सदृश स्तुतियों से ठगे जाते हुए, धन के मद से मत्त चित्त वाले [होते हुए], (इस कारण) निश्चेतनता = निर्बुद्धि होने से [धूर्त आदि द्वारा की गई स्तुतिओं को] उसी प्रकार का अर्थात् सत्य समझ कर अपने में झूठे अभिमान का आरोप करते हुए मरणशील होने पर भी स्वयं देवताओं के अंशों से मानों अवतीर्ण हों, मानों देवत्व से युक्त हो, मानों अतिमानव हों—इस प्रकार से अपने को समझते हुए, देवताओं के योग्य (उनके द्वारा करने योग्य) क्रियायें और प्रभाव को आरम्भ करते हुए (राजा लोग) सभी लोगों के उपहास के पात्र बनते हैं और सेवकों द्वारा अपनी [देवताओं के रूप में] की जाती हुई

१. ख्याति। २. तरलताम्। ३. अविशेषज्ञताम्।
४. अमानुषोचिताभिः। ५. मत्तनिश्चयेन। ६. तथेति, यथेति, आत्मारोपित०।

मर्त्यधर्म्मणोऽपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषमा[1]त्मानमुत्प्रेक्षमाणाः प्रारब्ध-दिव्योचितचेष्टानुभावाः सर्वजनस्योपहास्यतामुपयान्ति। आत्मविडम्बनाञ्चानुजीविना जनेन क्रियमाणामभिनन्दन्ति। मनसा देवताध्यारोपणविप्रतारणादसद्[2]भूत-सम्भा[3]वनोपहताश्चान्तः-प्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाट-माशङ्कन्ते।

निच्प्रत्ययान्तोऽयं शब्द इति भावः।] आत्मानम् = स्वम्, दिव्यांशावतीर्णम्—दिव्यांशाः (=देव-सम्बन्धिनो भागाः) तैरवतीर्णम् (= कृतावरणम्, जातम्), इव, अतएव, सदैवतम् = देवत्वविशिष्टम्, इव, अतिमानुषम् = अतिमनुष्यम्, इव, [मानुषम् अतिक्रान्तः—इत्यर्थे 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया' इति वार्तिकेन समासः।] उत्प्रेक्षमाणाः = सम्भावयन्तः, मन्यमानाः, प्रारब्धेत्यादिः—प्रारब्धाः (=समारब्धाः) दिव्योचिताः (=देवजनयोग्याः) चेष्टाः (= क्रियाः, व्यापाराः) ताभिः अनुभावाः (=माहात्म्यानि) यैस्ते तादृशाः, यद्वा —० चेष्टानुभावाः—चेष्टा (=अमानुषव्यापाराः,) अनुभावाः (=शापदानादिप्रभावाः) च यैस्ते तादृशाः, [आत्मनि देवत्वमध्यस्य देवानामिव कार्याणि कुर्वन्त इति भावः] सर्वजनस्य = सकललोकस्य, उपहास्यताम् = उपहासविषयताम्, उपयान्ति = प्राप्नुवन्ति। तेषा-मद्भुतव्यापारान् विलोक्य लोकाः मनसा वचसा च तेषामुपहासमेव कुर्वन्तीति भाव। पूर्वत्र इवशब्द-त्रयेणोत्प्रेक्षाऽलङ्कारः।

आत्मेति। च = किञ्च। अनुजीविना = सेवकेन, जनेन = लोकेन, क्रियमाणाम् = विधीयमानाम्, आत्मविडम्बनाम् = अविद्यमानगुणारोपणरूपां प्रतारणाम्, अभिनन्दन्ति = प्रशंसन्ति।

मनसेति। देवतेत्यादिः—देवतायाः (=विष्ण्वादेः) यद् अध्यारोपणम् (=परिकल्पनम्) तेन यत् प्रतारणम्(=प्रवञ्चनम्) तस्मात्, हेतोः,असद्भूत-सम्भावनोपहताः-असद्भूता (=मिथ्यारूपा अवास्तविकी) या सम्भावना (=आत्मनि देवत्वकल्पना) तया उपहताः (नष्टमतिकाः) सन्तः, मनसा = चित्तेन, आत्मबाहुयुगलम् = निजभुजयुग्मम्, अन्तःप्रविष्टेत्यादिः—अन्तः (= अभ्यन्तरे) प्रविष्टम् (=कृतप्रवेशम् निलीय विद्यमानम्) अपरभुजद्वयम्—अपरम् (=अन्यद्) भुजद्वयम् (= बाहुयुगलम्) यस्य यस्मिन् वा, तत्, तादृशम्, सम्भावयन्ति = उत्प्रेक्षन्ते, मन्यन्ते। एतेन स्वस्मिन् चतुर्भुजत्वं प्रकल्प्य विष्णुमेव मन्यते इति भावः। अत्रोत्प्रेक्षा।

त्वगिति। स्वललाटम् = निजमस्तकम्, त्वगन्तरितलोचनम्—त्वचा (=चर्मणा) अन्तरितम् (=व्यवहितम्, पिहितम्) तृतीयलोचनम् (=तृतीयनेत्रम्) यस्मिन् तत् तादृशम्, आशङ्कन्ते=उत्प्रेक्षन्ते। एतेन स्वस्मिन् त्रिनेत्रत्वं शिवत्वं कल्पयन्ति।

नकल (अनुकरण) की प्रशंसा करते हैं। देवताओं के अध्यारोपरूपी वञ्चना के कारण झूठी सम्भावना (अपने में देवत्व की कल्पना ; से नष्ट बुद्धि वाले होकर अपनी दो भुजाओं को, जिनमें अन्दर दो भुजायें और छिपी है, प्रविष्ट हैं—ऐसा मान बैठते हैं। [अर्थात् भीतर दो हाथ और छिपे हुए हैं अतः मैं चतुर्भुज विष्णु हूँ—ऐसा भ्रम करने लगते हैं।] अपने मस्तक को, चमड़ी से ढँकी हुई तीसरी आँख वाला समझ लेते हैं। [इससे तीन नेत्रों वाले शंकर का अवतार समझ लेते हैं।]

---

१. मानुष्यकम्। २. विप्रतारणा। ३. असद्भूत···समुद्भूत···।

दर्शनप्रदानमप्यनुग्रहं[1] गणयन्ति । दृष्टिपातमप्युपकारपक्षे स्थापयन्ति । सम्भाषणमपि संविभागमध्ये कुर्वन्ति । आज्ञामपि वरप्रदानं मन्यन्ते । स्पर्शमपि[2] पावनमाकलयन्ति । मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्[3], न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून् । अनर्थकायासान्तरितोपभोग-सुखमित्युपहसन्ति[4] विद्वज्जनम्[5], जरावैक्लव्यप्रलपितमिति पश्यन्ति

दर्शनेति । ते राजानः, दर्शनप्रदानम्=निजसाक्षात्कारप्रदानम्, स्वप्रकटनम्, अपि, अनुग्रहम्=प्रसादम्, गणयन्ति=आकलयन्ति । दृष्टिपातम् = नेत्रेणावलोकनमपि, उपकारपक्षे = उपकृतिपक्षे, स्थापयन्ति = निक्षिपन्ति । सम्भाषणम्=संजल्पनम्, अपि, संविभागमध्ये = पारितोषिकप्रदानमध्ये, कुर्वन्ति=विदधति । वार्तालापेन धनप्रदानस्य तुल्यत्वं गणयन्ति । आज्ञाम्=नियोगवचनम्, अपि, वरप्रदानम्=समीहितप्रदानम्, मन्यन्ते=जानन्ति । स्पर्शम् = हस्तादिना संश्लेषम्, अपि, पावनम्=पवित्रत्वोत्पादकम्, आकलयन्ति=विचारयन्ति ।

मिथ्येति । च = किञ्च, ते, मिथ्येत्यादिः—मिथ्या (= अलीकः) यो माहात्म्यगर्वः (=महत्त्वदर्पः) तेन निर्भराः (=परिपूर्णाः), सन्तः, देवताभ्यः = देवेभ्यः, न=नैव, प्रणमन्ति=प्रणतिं कुर्वन्ति, द्विजातीन् = ब्राह्मणान्, न = नैव, पूजयन्ति = अर्चन्ति । मान्यान्=सम्माननीयान्, न = नैव, मानयन्ति = सत्कुर्वन्ति । अर्चनीयान् = अर्चन-योग्यान्, न = नैव, अर्चयन्ति=पूजयन्ति । अभिवादनार्हान्=अभिवादनयोग्यान्, न = नैव, अभिवादयन्ति = अभिवादनं कुर्वन्ति, पादप्रणतिपूर्वकं नमस्कारं कुर्वन्ति । गुरून् = वृद्धान् आचार्यादीन्, न = नैव, अभ्युत्तिष्ठन्ति = अभ्युत्थानं कुर्वन्ति । 'देवताभ्यः प्रणमन्ती' त्यत्र चतुर्थी चिन्त्या । यद्वा—'देवता अनुकूलयितुं प्रणमन्तीत्यर्थे 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः'' (पा. सू. ३।२।१४) इति सूत्रेण चतुर्थी । अर्चयन्तीत्यत्र चौरादिकस्य 'अर्च पूजायाम्' इति धातोः रूपं न तु भौवादिकस्येति बोध्यम् ।

अनर्थकेति । अनर्थकेत्यादिः—अनर्थकः (= निष्फलः) य आयासः (= परिश्रमः), विद्यादि-समुपार्जने इति शेषः) तेन अन्तरितम् (=व्यवहितम्, परित्यक्तम्) उपभोगः (=कामिन्यादि-संसर्गः) तस्य तज्जनितं वा यत् सुखम् (= आनन्दः) यस्य तं तादृशम्, इति = अस्मात् कारणात्, विद्वज्जनम् = विपश्चिल्लोकम्, उपहसन्ति = उपहासं कुर्वन्ति ।

जरेति । जरेत्यादिः—जरायाः (= वृद्धत्वस्य) यत् वैक्लव्यम् (= विह्वलत्वम्) तेन प्रलपितम् (= प्रजल्पनम्), इति = एवं रूपेण, वृद्धोपदेशम् = गुरुजनपरामर्शम्, पश्यन्ति =

किसी को [अपना] दर्शन देना भी अनुग्रह गिनते हैं । [किसी पर]दृष्टिपात करना भी उपकार-पक्ष में स्थापित करते हैं । संभाषण करना (बात कर लेना) भी धनादि-प्रदान करने के मध्य में मानते हैं । आज्ञा देना भी वरप्रदान मानते हैं । स्पर्श कर लेना भी पवित्र करना समझते हैं । झूठे माहात्म्य (बड़प्पन)के गर्व से भरे हुए (वे राजा लोग)देवताओं को भी प्रणाम नहीं करते हैं । द्विजातियों=ब्राह्मणों को नहीं पूजते हैं । सम्माननीय लोगों को भी सम्मानित नहीं करते हैं । अभिवादन (=चरण-स्पर्शपूर्वक प्रणामादि) के योग्य व्यक्तियों का भी अभिवादन नहीं करते है । गुरुजनों को [उनके आगमन के समय] नहीं उठते हैं, अर्थात् उनके सम्मान में अपने आसन छोड़कर नहीं खड़े होते हैं । निरर्थक परिश्रम से उपभोग सुख का व्यवधान करने वाले हैं—ऐसा [कहकर] विद्वज्जनों का उपहास करते हैं । बुढ़ापे की विकलता से प्रलाप है— इस रूप में वृद्धजनों के उपदेश को देखते हैं, समझते हैं । अपनी

१. '''प्रदानेऽपि । २. संस्पर्शमपि । ३. द्विजान् ।
४. अन्तरितविषयोपभोग० । ५. विद्वज्जनशीलम् ।

वृद्धोपदेशम्[1], आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय, कुप्यन्ति हितवादिने। सर्वथा तमभिनन्दति; तमालपन्ति, तं पार्श्वे कुर्वन्ति, तं संवर्द्धयन्ति, तेन सह सुखमवतिष्ठन्ते, तस्मै ददति, तं मित्रतामुपनयन्ति[2], तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, तं बहु मन्यन्ते, तमाप्ततामापादयन्ति[3], योऽहर्निशमनवरतमुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति।

विलोकयन्ति, चिन्तयन्ति।

आत्मेति। आत्मेत्यादिः—आत्मनः (= स्वस्य) प्रज्ञायाः (= मनीषायाः) परिभवः (= तिरस्कारः), इति = एवं विचार्य, सचिवोपदेशाय = हितकारिमन्त्रिपरामर्शाय, असूयन्ति= असूयां कुर्वन्ति, गुणेषु दोषारोपपूर्वकं कुप्यन्ति। हितवादिने = हितभाषिणे, कुप्यन्ति = कुध्यन्ति। अत्र वाक्यद्वये "क्रुध-द्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः" इति सूत्रेण कोपविषयस्य सम्प्रदानत्वाच्चतुर्थी बोध्या।

सर्वथेति। तम् = तं जनम्, सर्वथा = सर्वप्रकारेण, अभिनन्दन्ति = प्रशंसन्ति, तम् = तं जनम्, सर्वथा, आलपन्ति = भाषन्ते, तम् = तं जनम्, सर्वथा, पार्श्वे = समीपे, कुर्वन्ति = विदधति, स्थापयन्ति। तम् = तं जनम्, संवर्द्धयन्ति = वृद्धिं सम्पन्नतां वा प्रापयन्ति, तेन = तेन जनेन, सह= सार्धम्, सुखम् = सानन्दम्, अवतिष्ठन्ते = अवस्थानं कुर्वन्ति। तस्मै = तस्मै जनाय, ददति = प्रयच्छन्ति, उपहारादीनिति शेषः। तम् = तं जनम्, मित्रताम् = सुहृत्ताम्, उपनयन्ति = प्रापयन्ति। तस्य = तस्य जनस्य, वचनम् = वाक्यम्, शृण्वन्ति = आकर्णयन्ति। तत्र = तस्मिन् जने, वर्षन्ति = वर्षणं कुर्वन्ति, धनादीनामिति शेषः। तम् = तं जनम्, बहु = अत्यधिकम्, मन्यन्ते = जानन्ति। तम् = तं जनम्, आप्तताम् = शिष्टताम्, यथार्थवक्तृताम्, आपादयन्ति = प्रापयन्ति।

योऽहर्निशमिति। यः=जनः, अहर्निशम्=रात्रिन्दिवम्, अनवरतम् = सततम्, उपरचिताञ्जलिः- उपरचितः (=विहितः, बद्धः) अञ्जलिः (=करपुटः) येन स तादृशः, तथा, विगतान्यकर्तव्यः— विगतानि (=समाप्तानि, अपगतानि) अन्यानि (=अपराणि) कर्त्तव्यानि (=कार्याणि) यस्य स तादृशः, सन्, अधिदैवतम् = अधिकदेवम्, इष्टदेवताम्, इव, स्तौति = नौति, प्रशंसा करोति। वा = अथवा, यः = जनः, माहात्म्यम् = महत्त्वम्, तद् गुणवैशिष्टयलक्षणं प्रभावम्, उद्भावयति = प्रकटयति, अन्येषां पुरः प्रदर्शयतीति भावः।

अर्थात् राजा की प्रज्ञा (बुद्धि) का परिभव (अपमान) है, ऐसा (सोंच कर) सचिवों के उपदेश से ईर्ष्या करते हैं, हित की बातें कहने वाले से क्रोध करते हैं। उसी का सभी प्रकार से सम्मान करते हैं, (स्वागत करते हैं,) उसी से बातचीत करते हैं, उसी को अपने पास करते है, (बैठाते हैं) उसी का संवर्द्धन करते है, (आगे बढ़ाते हैं) उसी के साथ सुख से बैठते हैं, उसी को [सभी उपहारादि] देते हैं, उसी से मित्रता करते हैं, उसी की बातें सुनते हैं, उसी पर [अनुग्रहों की] वर्षा करते हैं, उसी को बहुत मानते हैं (आदर करते हैं) और उसी को विश्वसनीय मानते हैं—जो दिनरात लगातार हाथ जोड़े (अंजलि बनाये) हुए, दूसरे सभी कार्यों को भूल कर (छोड़ते हुए) इष्टदेवता के समान स्तुति करता है अथवा माहात्म्य (बड़ाई) को प्रकट करता है, घोषित करता है।

---

१. न पश्यन्ति वृद्धोपदेशम्। २. तस्य मन्त्रिताम, तं मित्रतामुपनयन्ति।
३. तामात्म तापादयन्ति, तस्माद् बिभ्यति।

किंवा तेषां साम्प्रतम्[1], येषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्, अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः, पराभिसन्धानपरा मन्त्रिण उपदेष्टारः, नरपति-सहस्रभुक्तोज्झितायां लक्ष्म्यामासक्तिः, मारणात्मकेषु शास्त्रेष्वभियोगः[2], सहजप्रेमार्द्र-हृदयानुरक्ता भ्रातर उच्छेद्याः।

राज्ञां दोषान्तराण्येव वर्णयति—किं वेति। वा = अथवा, तेषाम् = ऐश्वर्यवतां राज्ञाम्, किम्, साम्प्रतम् = युक्तम्, 'असाम्प्रतम्' इति पाठे तु 'अयुक्तम्' इत्यर्थः—"युक्ते द्वे साम्प्रतं स्थाने' इत्यमर-कोषात्। तेषां राज्ञां न किमपि युक्तमिति भावः।

अयुक्तत्वं द्रढयन्नाह—येषामिति। येषाम् = राज्ञाम्, अतिनृशंसेत्यादिः—अतिनृशंसप्रायः (= अतिक्रूरबहुलः) य उपदेशः (= शिक्षणम्) तेन निर्घृणम् (= निर्दयम्) [निर्गता घृणा = करुणा यस्मात् तत्। "कारुण्यं करुणा घृणा।' इत्यमरः। यस्मिन् दयालवशेषोऽपि न विद्यते तादृशमिति भावः।] कौटिल्यशास्त्रम्—चाणक्यविरचित-नीतिशास्त्रम् 'कौटिलीयार्थशास्त्रम्', प्रमाणम् = प्रमायाः करणम्, नीतिनिर्धारणे सहायकमिति भावः। अभिचारेत्यादिः—अभिचारक्रिया (= श्येनयागादि-रूपान्यवधोत्पादकजघन्यकृत्यम्) तया क्रूराः (= नृशंसा, कठोराः) एकाः (= मुख्याः) प्रकृतयः (= स्वभावाः) येषां ते तादृशाः पुरोधसः = पुरोहिताः, गुरवः = हितोपदेशष्टारः। ["हिंसाकर्माभिचारः स्यात्।" 'एके मुख्यान्यकेवलाः।' इति चामरः।] परेत्यादिः—परेषाम् (= अन्येषाम्) अभिसन्धाने (= वञ्चनायाम्) पराः (= रताः), मन्त्रिणः = सचिवाः, उपदेष्टारः = परामर्श-दातारः, शिक्षका इति भावः। नरपतीत्यादि—नरपतीनाम् (= राज्ञाम्) सहस्रेण (= सहस्रसंख्यया, समूहेन) प्राक् भुक्ता (= उपभुक्ता) पश्चात् च उज्झिता (= परित्यक्ता) तस्यां तादृश्याम्, लक्ष्म्याम् = श्रियाम्, आसक्तिः = स्नेहाधिक्यम्। मारणात्मकेषु—मारणम् (=व्यापादनम्) एव आत्मा (= स्वरूपम्) येषां तादृशेषु, [समासान्तः कप्प्रत्ययः] शास्त्रेषु = योगिनीतन्त्रादिषु, 'शस्त्रेषु' इति पाठे तु 'आयुधेषु' इत्यर्थः। सहजेत्यादिः—सहजम् (= स्वाभाविकम्) यत् प्रेमा (= स्नेहः) तेन आर्द्रम् (= क्लिन्नम्, सदयम्) हृदयम् (= चित्तम्) येषां ते तादृशा, अत एव अनुरक्ताः (= स्नेहशीलाः) भ्रातरः (= सहोदराः) उच्छेद्याः = समूलं विनाशयोग्या। अत्र विविधकार्यायुक्तत्वप्रतिपादनरूपकार्यं प्रति अनेकहेतूनामुपन्यासात् समुच्चयालङ्कारो बोध्यः।

अथवा उनके लिए क्या उचित है अर्थात् कुछ भी उचित नहीं है, जिनके लिये अत्यधिक क्रूरतासे परिपूर्ण (भरे हुए) उपदेशों के कारण कठोर कौटिल्य शास्त्र ही प्रमाण (प्रमात्मक ज्ञान का कारण) है। अभिचार (मारणादि) क्रिया के कारण केवल क्रूर स्वभाव वाले पुरोहित ही गुरुजन हैं (उन्हीं का उपदेश पालनीय है।) दूसरों को ठगने में लगे हुए मन्त्री लोग ही [हिताहित के] उपदेश देनेवाले हैं, हजारों राजाओं द्वारा उपभोग करने के बाद छोड़ी गई लक्ष्मी में अतिशय आसक्ति (लगाव) है, मारण-स्वभाव वाले (जिनके अध्ययन से मार डालने की क्रिया का ज्ञान होता है ऐसे) शास्त्रों में (उनके अध्ययन में) आग्रह है, स्वाभाविक प्रेम से आर्द्र (द्रवित) हृदय वाले (अत एव) अनुरक्त भाई लोग ही उच्छेद (विनाश, मारण) करने योग्य हैं।

---

१. असाम्प्रतम्। २. शस्त्रेषु।

तदेवंप्राया[1]तिकुटिल-कष्ट-चेष्टा-सहस्रदारुणे राज्यतन्त्रे, अस्मिन् महामोहकारिणि[2] च यौवने, कुमार ! तथा[3] प्रयतेथा यथा नोपहस्यसे जनैः,[4] न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे[5] सुहृद्भिः, न शोच्यसे विद्वद्भिः । यथा च न प्रकाश्यसे[6] विटैः, न प्रहस्यसे कुशलैः, नास्वाद्यसे भुजङ्गैः, नावलुप्यसे सेवकवृन्दैः,[9] न वञ्च्यसे धूर्त्तैः,[7] न प्रलोभ्यसे

प्रकृतमुपसंहारयन्नाह—**तदेवमिति** । तत् = तस्मात्, एवंप्रायेत्यादिः—एवंप्रायाः (= पूर्ववर्णितस्वरूपबहुलाः) अतिकुटिलाः (= अतिशयवक्राः) कष्टचेष्टाः (= दुःखप्रदायिन्यः कायव्यापारा ईहा वा) तासां सहस्रम् (= प्रचुरम्) तेन दारुणे (= भीषणे) राज्यतन्त्रे = राज्यशासनव्यापारे, अस्मिन् = अतिप्रसिद्धेऽनुभूयमाने, महामोहकारिणि = महामूर्खत्वजनके, च, यौवने = तारुण्ये, हे कुमार ! = प्रियवत्स चन्द्रापीड !, तथा = तेन प्रकारेण, प्रयतेथाः = प्रयत्नं कुरु, यथा = येन प्रकारेण, जनैः = लोकैः, न = नैव उपहस्यसे = उपहासविषयीक्रियसे । साधुभिः = सज्जनैः, न = नैव, निन्द्यसे = निन्दाविषयी-क्रियसे । गुरुभिः = मान्यैर्वृद्धैर्हितोपदेशकारिभिः, न = नैव, धिक्क्रियसे = धिक्कृतिपात्रं विधीयसे । सुहृद्भिः = मित्रैः, न = नैव, उपालम्भसे = उपालम्भविषयीक्रियसे । विद्वद्भिः = पण्डितैः, न = नैव, शोच्यसे = शोकविषयीक्रियसे ।

यथेति । यथा च = येन प्रकारेण च, विटैः = षिड्गैः, कामुकलोकैः, न = नैव, प्रकाश्यसे = प्रकटीक्रियसे, तेषां सहचरत्वेनेति शेषः । कुशलैः = निपुणैः, न = नैव, प्रहस्यसे = प्रहासविषयीक्रियसे । भुजङ्गैः = धूर्तैः, न = नैव, आस्वाद्यसे = उपभुज्यसे, सेवकादिरूपेण प्रविश्य धनादिकं न गृह्यते इति भावः । सेवकवृन्दैः = भृत्यवर्गैः, न = नैव, अवलुप्यसे = अवलुण्टयसे क्वचित्तु 'सेवकवृकै'रिति पाठः । सेवकाः एव वृका ईहामृगास्तैरित्यर्थः । धूर्त्तैः = शठैः, न = नैव, वञ्च्यसे = प्रतार्यसे । वनिताभिः =

इसलिए इस (पूर्वोक्त) प्रकार की हजारों अत्यन्त कुटिल, कष्टदायक चेष्टाओं (क्रियाकलापों) से भयानक राज्यतन्त्र में (राजा के शासन में) और महान् मोह (मूर्खता) को उत्पन्न कराने वाले इस यौवन में (अर्थात् तुम्हारे पास ये दोनों स्थितियाँ होने पर) हे प्रिय कुमार चन्द्रापीड ! तुम्हें इस प्रकार से प्रयास करना चाहिए जिस प्रकार से लोगों द्वारा तुम्हारा उपहास (हँसी) न किया जाय, सज्जनों द्वारा निन्दा के पात्र न बनो, गुरुओं द्वारा धिक्कारे न जाओ, मित्रों द्वारा उलाहना न दिया जाये, (उपालम्भ के पात्र न बन जाओ,) विद्वानों द्वारा शोक के विषय न बन जाओ (विद्वान् तुम्हें देखकर शोक न करने लगें) और जिस प्रकार से विटों (कामुकजनों) द्वारा [उनके साथी के रूप में समाज में] प्रकाशित न किये जाओ । [लोक-व्यवहार में] निपुण व्यक्तियों द्वारा हँसे न जाओ (तुम्हारी हँसी न उड़ाई जाय) [अथवा अकुशल व्यक्तियों द्वारा ठगे न जाओ] भुजङ्ग = धूर्तों द्वारा आस्वादित न किये जाओ(अर्थात् वे तुम्हारे धनादि को ठग कर मौज-मस्ती न उड़ावें), सेवकसमूह (सेवकरूपी भेड़ियों) द्वारा लुप्त (विनष्ट) न किये जाओ, धूर्तों द्वारा ठगे न जाओ, स्त्रियों द्वारा लुभाये न

१. एवंप्राये····कुटिलकुचेष्टा, कुटिलचेष्टा० ।　२. महामोहान्धकारिणि ।
३. तथा तथा, यथा यथा ।　४. जनेन ।　६. उपलभ्यसे ।
७. प्रताय्यसे ।　८. प्रतार्यसे ।　९. सेवकवृकैः ।

वनिताभिः,[1] न विडम्ब्यसे लक्ष्म्या,न नर्त्यसे मदेन, नोन्मत्तीक्रियसे मदनेन, नाक्षिप्यसे विषयैः, नावकृष्यसे[2] रागेण,[3] नापह्रियसे[4] सुखेन । कामं भवान् प्रकृत्यैव धीरः,[5] पित्रा च समारोपित-संस्कारः, तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि, तथापि भवद्गुणसन्तोषो[6] मामेवं मुखरीकृतवान् । इदमेव च पुनः पुनरभिधीयसे । विद्वांसमपि सचेतनमपि महासत्त्वमप्यभिजात-मपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति । सर्वथा कल्याणैः

कामिनीभिः न = नैव, प्रलोभ्यसे = आकृष्यसे, ताभिर्न वशीक्रियसे इति भावः । लक्ष्म्या = श्रिया, न = नैव, विडम्ब्यसे = बिडम्बनायुक्तो विधीयसे, परित्यज्यसे इति भावः । मदेन = गर्वेण, न = नैव,नर्त्यसे— नाट्यसे । मदनेन = कामेन, न = नैव, उन्मत्तीक्रियसे = उन्मत्ततां नीयसे । विषयैः = इन्द्रियार्थैः स्पर्शादिभिरिति भावः न = नैव, आक्षिप्यसे = एकान्तमाकृष्यसे । रागेण = अनुरागेण, न = नैव, अवकृष्यसे = आकृष्यसे । कस्मिंश्चिद्विषयविशेषे व्यक्तिविशेषे वा रागाधिक्येन तं प्रति नाकृष्यसे इति भावः । सुखेन = आनन्देन, न = नैव, अपह्रियसे = परित्यज्यसे, स्ववशीक्रियसे वा ।

कामम्मिति । अत्रादौ 'यद्यपि' इति संयोज्य पठनीयम् । यद्यपि, भवान् = त्वम्, प्रकृत्या = स्वभावेन, एव, धीरः = धैर्यशाली, असि । पित्रा = तातेन तारापीडेन, च, समारोपितसंस्कारः—समारोपिताः (= शिक्षादिभिः संस्थापिताः) संस्काराः (= पवित्रवासनाः) यस्मिन् स तादृशः, असि । तरलहृदयम्—तरलम् (= चञ्चलम्) हृदयम् (= मनः) यस्य तं तादृशम्, अस्थिरचित्तमिति भावः, अप्रतिबुद्धम् = औचित्यानौचित्यबोधरहितम्, च, जनम्, धनानि = वित्तानि,मदयन्ति = उन्मत्तं कुर्वन्ति । तथापि, भवद्गुणसन्तोषः—भवतः (= तव चन्द्रापीडस्य) गुणेषु (= शौर्यगाम्भीर्यादिषु) सन्तोषः (= सन्तुष्टिः) माम् = शुकनासम्, एवम्=उक्तरूपेण, उपदेशप्रदानायेति शेषः, मुखरीकृतवान् = वाचालं विहितवान् । भवते समुचितोपदेशदानाय प्रायोजयदिति भावः ।

इदमिति । इदम् = पूर्वोक्तम्, पुनः पुनः = बारं वारम्, अभिधीयसे = कथ्यसे, उपदिश्यसे । किन्तदिति वर्णयति—**विद्वांसमिति** । विद्वांसम् = बुधम्, अपि, सचेतनम् = ज्ञानवन्तम्, सदसद्विवेकशीलम्, अपि, महासत्त्वम् = अतिशयशक्तिमन्तम्, अपि, अभिजातम् = सत्कुलोत्पन्नम्, अपि, धीरम् = धैर्यशालिनम्, अपि, प्रयत्नवन्तम्=प्रयासनिरतम्, उद्योगिनम्,अपि,पुरुषम् = जनम्, इयम् = निर्दिश्यमाना, लक्ष्मीः = श्रीः, खलीकरोति = दुष्टीकरोति,सन्मार्गात् स्खलनां प्रापयति, इति = समाप्ताविदम् ।

जाओ, लक्ष्मी द्वारा बिडम्बित न किये जाओ अर्थात् तुम्हें छोड़कर लक्ष्मी चली न जावे, अहंकार द्वारा नचाये न जाओ, कामदेव द्वारा पागल न बना दिये जाओ, विषयों (भोग सामग्री) द्वारा खींचे न जाओ, राग द्वारा आकृष्ट न किये जाओ, सुख द्वारा अपहृत न कर लिये जाओ । यह ठीक है कि आप स्वभाव से ही धीर (धैर्यशाली) हैं और पिता द्वारा अच्छे संस्कार डलवाये गये हैं । चञ्चल मन वाले और अप्रबुद्ध = अज्ञानी को ही धन मत्त कर पाते हैं, फिर भी आपके गुणों के प्रति मेरे सन्तोष ने मुझे इस प्रकार से मुखर बनाया अर्थात् तुमसे कहने के लिए विवश किया । और बार-बार यही कहा जाता है । यह दुष्ट लक्ष्मी विद्वान् को भी, ज्ञानवान् को भी, महाबलशाली को भी, उच्चकुलवाले को भी, धैर्यशाली को भी तथा प्रयत्न (उद्योग) में लगे रहनेवाले को भी दुष्ट बना डालती है । [अतः इस लक्ष्मी से बहुत अधिक सावधान रहना आवश्यक है ।] पिता तारापीड द्वारा किये जाते हुए

---

१. सर्ववनिताभिः ।   २. विकृष्यसे रज्यसे, आकृष्यसे ।   ३. रागैः ।
४. उपह्रियसे । ५. इतः पूर्वं 'महता प्रयत्नेन' इत्यधिकः पाठोऽपि दृश्यते । ६. एव ।

पित्रा क्रियमाणमनुभवतु भवान् [1]नवयौवराज्याभिषेक[2]मङ्गलम्। कुलक्रमागतामुद्वह पूर्वपुरुषै-रूढां धुरम्। अवनमय द्विषतां शिरांसि। उन्नमय [3]स्वबन्धुवर्गम्। अभिषेकानन्तरञ्च प्रारब्ध-दिग्विजयः परिभ्रमन् विजितामपि तव[4] पित्रा [5]सप्तद्वीपभूषणां पुनर्विजयस्व वसुन्धराम्। अयञ्च ते कालः प्रतापमारोपयितुम्। आरूढप्रतापो [6]हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति"—

सर्वथेति। सर्वथा = सर्वप्रकारेण, कल्याणैः = मङ्गलैः, सहेति शेषः, पित्रा = जनकेन तारापीडेन, क्रियमाणम् = विधीयमानम्, नवयौवराज्याभिषेक-मङ्गलम्—नवः (= नूतनः प्राथमिकः) यो यौवराज्ये (= युवराजकर्मणि युवराजपदे इति भावः) अभिषेकः (= अभिषेचनम्) स एव मङ्गलम् (= श्रेयः) तत्, भवान् = त्वं चन्द्रापीडः, अनुभवतु = अनुभवविषयीकरोतु, उपभोगं करोत्विति भावः। कुलक्रमागताम्—कुलक्रमः (= वंशपरम्परा) तेनागताम् (= प्राप्ताम्), पूर्वपुरुषैः = पूर्वजलोकैः, ऊढाम् = धृताम्, धुरम् = राज्यशासनभारम्, उद्वह = धारय। द्विषताम् = शत्रूणाम्, शिरांसि = उत्तमाङ्गानि, अवनमय = अवनतानि विधेहि। स्वबन्धुवर्गम् = स्वज्ञातिसमूहम्, उन्नमय = उन्नतं कुरु। शत्रूणां दमनेन तेषां दर्पं दलय, बन्धूनां च सम्मानेन तेषां गौरवं वर्धय। एतद्द्वयं सर्वतः प्रथममेव कार्यमिति भावः।

अभिषेकेति। च = किञ्च। अभिषेकानन्तरम् = युवराजपदेऽभिषेचनादनु, प्रारब्ध-दिग्विजयः—प्रारब्धः (= प्रस्तुतः) दिग्विजयः (= दिशां तत्रत्यानां राज्ञां स्वाधीनीकरणम्) येन स तादृशः, परिभ्रमन् = प्रतिदिशं स्वच्छन्दरूपेण विहरन्, तव = भवतः, पित्रा = जनकेन तारापीडेन, विजिताम् = स्वायत्तीकृताम्, अपि, सप्तद्वीपभूषणाम्—सप्त (=सप्तसंख्यकानि) द्वीपानि (=अन्तरीपाणि) एव भूषणानि (= आभरणानि) यस्यास्तां तादृशीम्, वसुन्धराम् = पृथिवीम्, पुनः = भूयः, विजयस्व = स्वाधीनीकुरु। वि-योगे जिधारोत्मनेपदम् "विपराभ्यां जे"रिति सूत्रेण बोध्यम्।

विजितायाः विजयकरणे किं फलमिति निरूपयितुमाह—**अयमिति**। प्रतापम् = कोशदण्डजं तेजः, आरोपयितुम् = स्थापयितुम्, शत्रुष्विति शेषः, अयम् = समीपवर्ती, एव, कालः = समयः, समागत इति भावः। किमर्थमिति चेदत आह—**आरूढेति**। हि = यतः, आरूढप्रतापः—आरूढः (= शत्रुषु संजातः) प्रतापः (= कोशदण्डजं तेजः) यस्य स तादृशः, राजा = भूपतिः, त्रैलोक्यदर्शी = त्रिलोकद्रष्टा योगी, इव, सिद्धादेशः—सिद्धः (= अप्रतिहतः) आदेशः (= आज्ञा) यस्य स तादृशः, त्रिकालदर्शी

नव यौवराज्य पद के अभिषेकमङ्गल का हर प्रकार के कल्याणों के साथ अनुभव करो अर्थात् तुम्हारा युवराज पद पर किया जाने वाला यह अभिषेक सभी प्रकार के कल्याण करने वाला हो। [यह मेरा आशीर्वाद है।] कुलपरम्परा से प्राप्त होनेवाले तथा अपने पूर्वपुरुषों द्वारा निर्वाह = धारण किये गये शासन-भार का वहन करो। शत्रुओं के सिर नीचे कर दो। [उन्हें इतना भयभीत कर दो कि वे कभी सामने सिर उठाने या स्वतन्त्र होने की सोच न सकें।] बन्धुओं को उन्नत करो। [अपने प्रभाव से उनमें आत्मविश्वास और आत्मसम्मान की भवना जगा दो।] और अभिषेक के बाद दिग्विजय प्रारम्भ करते हुए [स्वच्छन्दता से] विचरण करते हुए, अपने पिता द्वारा पहले से ही जीती गई (अधीन की गई) भी सात द्वीपों (जम्बू, प्लक्षादि) से अलंकृत पृथिवी को फिर से जीत डालो। [जिससे तुम्हारे पौरुष और बुद्धिचातुर्य का प्रभाव सर्वत्र हो जाय।] तुम्हारे प्रताप को [शत्रु आदि

१. नवयौवन....। २. अनेकमङ्गलम्। ३. क्वचित्तु 'स्व' इदं नास्ति।
४. भवत्। ५. द्वीपसमुद्रभूषणाम्। ६. 'हि' इदं नापि दृश्यते क्वचित्।

इत्येतावदभिधायोपशशाम । उपशान्तवचसि[1] शुकनासे चन्द्रापीडस्ताभिरुपदेशवाग्भिः[2] प्रक्षालित इव, उन्मीलित इव, स्वच्छीकृत[3] इव, निर्मृष्ट इव, अभिषिक्त इव, अभिलिप्त इव, अलङ्कृत इव, पवित्रीकृत इव, उद्भासित इव, प्रीतहृदयो मुहूर्तं स्थित्वा स्वभवनमाजगाम ।

[इति शुकनासोपदेशः]

योगी यथा वदति सर्वं तथैव भवति । राजाऽपि यथा वदेत् तथैव भवितव्यम् । एतत्तदैव सम्भवति यदा सर्वेऽपि राजप्रतापाभिभूताः जायन्ते इति भावः । इति = एवंरूपेण, एतावत् = पूर्वोक्तप्रमाणम् अभिधाय = उक्त्वा, उपशशाम = शान्तोऽभूत्, शुकनासो विरतवाग्व्यापारोऽभूदिति भावः ।

उपशान्तेति । शुकनासे = प्रधानाऽमात्ये, उपशान्तवचसि—उपशान्तानि (= निवृत्तानि) वचांसि (= वचनानि) यस्य तस्मिन् तादृशे, मौने सति, चन्द्रापीडः = एतन्नामा राजकुमारः, ताभिः = शुकनासोक्ताभिः पूर्वाभिः, उपदेशवाग्भिः = हितकारिवचनैः, प्रक्षालितः = धौतः, इव, उन्मीलितः = विकसितः, इव, स्वच्छीकृतः = निर्मलीकृतः, इव, निर्मृष्टः = मसृणीकृतः, संस्कृतः, इव, अभिषिक्तः = स्नपितः, इव, अभिलिप्तः = प्रलिप्तः, इव, अलङ्कृतः = विभूषितः, इव, पवित्रीकृतः = पावनीकृतः, इव, उद्भासितः = उद्दीपितः, इव, प्रीतहृदयः—प्रीतम् (= प्रसन्नम्) हृदयम् (= चित्तम्) यस्य तादृशः, सन्, मुहूर्तम् = क्षणम्, स्थित्वा = अवस्थानं कृत्वा, स्वभवनम् = स्वसदनम्, आगजाम = आययौ, परावृते । अत्र 'प्रक्षालित इव' इत्यत आरभ्य 'उद्भासित इव' इत्येतत्पर्यन्तं नवानां क्रियोत्प्रेक्षाणां परस्परं निरपेक्षतया स्थित्या संसृष्टिरलङ्कारः ।

॥ इति शुकनासोपदेशः ॥

कृपया विश्वनाथस्य वाग्देव्याश्च प्रसादतः ।
शुकनासोपदेशान्तं व्याचष्ट जयशङ्करः ॥

सभी पर] स्थापित करने का यह उचित समय [आ गया] है । जिसका प्रताप स्थापित हो जाता है ऐसा राजा त्रैलोक्यदर्शी (तीनों लोकों, कालों को देखने में समर्थ) योगी के समान सिद्ध आदेश (१–जिसकी आज्ञायें सदैव परिपालित होती हैं, २–जिसके वचन = भविष्य वाणियाँ सदैव सच हुआ करती हैं ऐसा) वाला होता है—" इस प्रकार से इतना (पूर्वोक्त) कहकर शुकनास शान्त = चुप हो गया । शुकनास के शान्त होने (बोलना बन्द कर देने) पर उसके उन वचनों द्वारा चन्द्रापीड मानों प्रक्षालित (धोया हुआ), मानों विकसित, (खिला हुआ), मानों स्वच्छ किया गया, मानो नहलाया गया, मानों [चन्दनादि का] लेप कराया गया, मानो [आभूषणों से] सजाया गया, मानो पवित्र किया गया, मानो उद्दीप्त किया (चमकाया) गया, प्रसन्न हृदय वाला [होता हुआ] कुछ ही देर रुक कर अपने भवन वापस आ गया ।

[इस प्रकार शुकनास का उपदेश समाप्त हुआ ।]

---

१. ···वचने । २. ताभिरमलाभिरुपदेश० । ३. स्वस्थीकृतः ।